काव्यालङ्कारसूत्रवृत्तिः

श्रीवामनविरचिता ।

पण्डितकुलपतिना
श्रीजीवानन्दविद्यासागर-भट्टाचार्य्येण
संस्कृता प्रकाशिता च ।

द्वितीयसंस्करणम् ।

कलिकातानगर्य्याम्
नारायणयन्त्रे मुद्रिता ।

ई १८८२ ।

প্রকাশক—পণ্ডিত শ্রীজীবানন্দবিদ্যাসাগর,
২নং রমানাথ মজুমদারের ষ্ট্রীট্ কলিকাতা

প্রিণ্টার—শ্রীরামনারায়ণ পাল
৭৫নং কটন ষ্ট্রীট্ কলিকাতা।



पण्डितकुलपतिः

श्रीजीवानन्दविद्यासागर वि, ए,

PANDIT JIBANANDA VIDYASAGARA, B. A.

Superintendent Free Sanskrit College, Calcutta.

काव्यालङ्कारसूत्रवृत्तिः ।

शारीरं नाम प्रथममधिकरणम् । 34025

प्रथमोऽध्यायः ।

प्रणम्य परमं ज्योतिर्वामनेन कविप्रिया ।
काव्यालङ्कारसूत्राणां स्वर्था वृत्तिर्विधीयते ॥

काव्यं ग्राह्यमलङ्कारात् ॥ १ ॥

काव्यं खलु ग्राह्यमुपादेयं भवति अलङ्कारात् । काव्यशब्दोऽयं गुणालङ्कारसंस्कृतयोः शब्दार्थयोर्वर्त्तते । भक्त्या तु शब्दार्थमात्रवचनोऽत्र गृह्यते ।

कोऽसावलङ्कार इत्यत आह—

सौन्दर्य्यमलङ्कारः ॥ २ ॥

अलङ्कृतिः अलङ्कारः । करणव्युत्पत्त्या पुनः अलङ्कारशब्दोऽयम् उपमादिषु वर्त्तते ।

स दोषगुणालङ्कारहानादानाभ्याम् ॥ ३ ॥

स खलु अलङ्कारो दोषहानात्, गुणालङ्कारदानाच्च सम्पाद्यः कवेः ॥

शास्त्रतस्ते ॥ ४ ॥

ते दोषगुणालङ्कारहानादाने शास्त्रादस्मात् । शास्त्रतो हि ज्ञात्वा दोषान् जह्यात्, गुणालङ्कारांश्च आद

किं पुनः फलम् अलङ्कारवता काव्येन येन एतदर्थोऽयं यत्न इत्याह—

काव्यं सत् दृष्टादृष्टार्थम्, प्रीतिकीर्त्तिहेतुत्वात् ॥५

काव्यं सत् चारु दृष्टप्रयोजनम्, प्रीतिहेतुत्वात्, अदृष्टप्रयोजनम्, कीर्त्तिहेतुत्वात्। अत्र श्लोकाः—

"प्रतिष्ठां काव्यबन्धस्य यशसः सरणिं विदुः।
अकीर्त्तिवर्त्तिनीं त्वेवं कुकवित्वविडम्बनाम् ॥
कीर्त्तिं स्वर्गफलामाहु रासंसारं विपश्चितः।
अकीर्त्तिं च निरालोकनरकोद्देशदूतिकाम् ॥
तस्मात्कीर्त्तिमुपादातुमकीर्त्तिं च व्यपोहितुम्।
काव्यालङ्कारशास्त्रार्थः प्रसाद्यः कविपुङ्गवैः ॥"

इति काव्यालङ्कारसूत्रवृत्तौ शारीरे प्रथमेऽधिकरणे प्रथमोऽध्यायः।
प्रयोजनस्थापना।

द्वितीयोऽध्यायः।

अधिकारिनिरूपणार्थमाह—

अरोचकिनः सतृणाभ्यवहारिणश्च कवयः ॥ १ ॥

इह खलु द्वये कवयः सम्भवन्ति—अरोचकिनः, सतृणाभ्यवहारिणश्च इति। अरोचकिसतृणाभ्यवहारिशब्दौ गौणार्थौ। कोऽसौ अर्थः?—विवेकित्वमविवेकित्वं चेति।

तदाह—

पूर्वे शिष्याः,—विवेकित्वात् ॥ २ ॥

पूर्वे खलु अरोचकिनः शिष्याः शासनीयाः, विवेकित्वात् विवेचनशीलत्वात्।

नेतरे,—तद्विपर्य्ययात् ॥ ३ ॥

यात्

अवि

न —

ति

वाक्य

विशेष —

व

सा ... गौड़ीया पाञ्चाली च ॥ ९ ॥

सा च इयं रीतिस्त्रिधा भिद्यते—वैदर्भी, गौड़ीया, पाञ्चाली चेति।

किं पुनः देशवशाद् द्रव्यवद्गुणोत्पत्तिः काव्यानाम्, येन अयं देशविशेषव्यपदेशः। नैवम्। यदाह—

किं पुनः फलम् अलङ्कारवता काव्येन येन एतदर्थोऽयं यत्न इत्याह—

काव्यं सत् दृष्टादृष्टार्थम्, प्रीतिकीर्त्तिहेतुत्वात् ॥५

... हेतुत्वात्, अदृष्ट-

—

।

॥

।

॥

म्।

।”

यमोऽध्यायः।

वयः ॥ १ ॥

किनः, सतृणा-

हारिशब्दौ गौ-

कत्वं चेति।

॥ २ ॥

पूर्वे खलु अरोचकिनः शिष्याः शासनीयाः, विवेकित्वात् विवेचनशीलत्वात् ।

नेतरे,—तद्विपर्ययात् ॥ ३ ॥

इतरे सत्त्वाभ्यवहारिणो न शिष्याः,—तद्विपर्ययात् अविवेचनशीलत्वात् । न च शीलमपाकर्त्तुं शक्यम् ।

ननु एवं न शास्त्रं सर्वानुग्राहि कुतस्तदुपादीयते तदाह—

न शास्त्रमद्रव्येष्वर्थवत् ॥ ४ ॥

न खलु शास्त्रम् अद्रव्येषु अविवेकिषु अर्थवत् ।

निदर्शनार्थमाह—

न कतकं पङ्कप्रसादनाय ॥ ५ ॥

नहि कतकं पयस इव पङ्कस्य प्रसादनाय प्रभवति ।

अधिकारिणो निरूप्य रीतिनिश्चयार्थमाह—

रीतिरात्मा काव्यस्य ॥ ६ ॥

रीतिर्नाम इयम् आत्मा काव्यस्य, शरीरस्य इव इति वाक्यशेषः ।

का पुनः इयं रीतिः इत्याह—

विशिष्टा पदरचना रीतिः ॥ ७ ॥

विशेषवती पदानां रचना रीतिः । कोऽसौ विशेष इत्याह—

विशेषो गुणात्मा ॥ ८ ॥

वक्ष्यमाणगुणरूपो विशेषः ।

सा त्रिधा—वैदर्भी गौड़ीया पाञ्चाली च ॥ ९ ॥

सा च इयं रीतिस्त्रिधा भिद्यते—वैदर्भी, गौड़ीया, पाञ्चाली चेति ।

किं पुनः देशवशाद् द्रव्यवद्गुणोत्पत्तिः काव्यानाम्, येन अयं देशविशेषव्यपदेशः । नैवम् । यदाह—

विदर्भादिषु दृष्टत्वात्तत्समाख्या ॥ १० ॥

विदर्भगौडपाञ्चालेषु देशेषु तत्रत्यैः कविभिः यथास्वरूपम् उपलब्धत्वात् तत्समाख्या, न पुनर्देशैः किञ्चिदुपक्रियते काव्यानाम् ।

तासां गुणभेदात् भेदमाह—

समग्रगुणा वैदर्भी ॥ ११ ॥

समग्रैः ओजःप्रसादप्रभृतिभिः गुणैः उपेता वैदर्भी नाम रीतिः ।

अत्र श्लोकौ—"अस्पृष्टा दोषमात्राभिः समग्रगुणगुम्फिता ।
विपञ्चीस्वरसौभाग्या वैदर्भी रीतिरिष्यते' ॥ (१)

अलङ्कारादिसौभाग्यां तामेकामेव कवयः स्तुवन्ति—

"सति वक्तरि सत्यर्थे सति शब्दानुशासने ।
अस्ति तन्न विना येन परिस्रवति वाङ्मधु" ॥ (२)

अत्र उदाहरणम्—'गाहन्तां महिषा निपानसलिलं शृङ्गैर्मुहुस्ताडितं
छायाबद्धकदम्बकं मृगकुलं रोमन्थमभ्यस्यतु ।
विस्रब्धैः क्रियतां वराहपतिभिर्मुस्ताक्षतिः पल्वले
विश्रान्तिं लभतामिदञ्च शिथिलज्याबन्धमस्मद्धनुः' ॥

ओजःकान्तिमती गौड़ीया ॥ १२ ॥

ओजः कान्तिश्च विद्येते यस्यां सा ओजःकान्तिमती गौडीया नाम रीतिः—माधुर्य्यसौकुमार्य्ययोः अभावात्, समासबहुला अत्युल्वणपदा च ।

अत्र श्लोकः—'समस्तात्युत्कटपदामोजःकान्तिगुणान्विताम् ।
गौड़ीयामिति गायन्ति रीतिं रीतिविशारदाः' ॥

उदाहरणम्—'दोर्दण्डाञ्चितचन्द्रशेखरधनुर्दण्डावभङ्गोद्यत-
टङ्कारध्वनिरार्य्यबालचरितप्रस्तावनाडिण्डिमः ।

द्राक् पर्य्यस्तकपालसम्पुटमिलद्‌ब्रह्माण्डभाण्डोदर-
भ्राम्यत्पिण्डितचण्डिमा कथमहो नाद्यापि विश्राम्यति' ॥

माधुर्य्यसौकुमार्य्योपपन्ना पाञ्चाली ॥ १३ ॥

माधुर्य्येण सौकुमार्य्येण च गुणेन उपपन्ना पाञ्चाली नाम रीतिः। ओजःकान्त्यभावात् अनुल्वणपदा विच्छाया च।

तथा च श्लोकः—'आश्लिष्टश्लथभावां तां पुराणच्छाययाश्रिताम्।
मधुरां सुकुमारां च पाञ्चालीं कवयो विदुः' ॥

अत्र उदाहरणम्—'ग्रामेऽस्मिन् पथिकाय पान्थ वसतिर्नैवाधुना दीयते
रात्रावत्र विहारमण्डपतले पान्थः प्रसुप्तो युवा।
तेनोत्थाय खलेन गर्जति घने स्मृत्वा प्रियां तत्कृतं
येनाद्यापि करङ्कदण्डपतनाशङ्की जनस्तिष्ठति' ॥

एतासु तिसृषु रीतिषु रेखासु इव चित्रं काव्यं प्रतिष्ठितमिति।

तासां पूर्वा ग्राह्या,—गुणसाकल्यात् ॥१४॥

तासां तिसृणां रीतिनां पूर्वा वैदर्भी ग्राह्या, गुणानां साकल्यात्।

न पुनरितरे,—स्तोकगुणत्वात् ॥ १५ ॥

इतरे गौडीयपाञ्चाल्यौ न ग्राह्ये, स्तोकगुणत्वात्।

तदारोहणार्थमितराभ्यास इत्येके ॥ १६ ॥

तस्या वैदर्भ्या एव आरोहणार्थमितरयोरपि रीत्योः अभ्यास इत्येके मन्यन्ते।

तत्तु न,—अतत्त्वशीलस्य तत्त्वानिष्पत्तेः ॥१८॥

नहि अतत्त्वं शीलयतः तत्त्वं निष्पद्यते।

निदर्शनार्थमाह—

न शणसूत्रवानाभ्यासे त्रसरसूत्रवाने वैचित्र्यलाभः ॥ १८ ॥

नहि शणसूत्रवानमभ्यस्यन् कुविन्दः त्रसरसूत्रवानवैचित्र्यं लभते ।

सापि समासाभावे शुद्धवैदर्भी ॥ १९ ॥

सापि च वैदर्भी रीतिः शुद्धवैदर्भी भण्यते । यदि समासवत्पदं न भवति ।

तस्यामर्थगुणसम्पदास्वाद्या ॥ २० ॥

तस्यां वैदर्भ्यामर्थगुणसम्पदास्वाद्या भवति ।

तदुपारोहादर्थगुणलेशोऽपि ॥ २१ ॥

तदुपधानतः खलु अर्थलेशोऽपि स्वदते । किमङ्ग, पुनः अर्थगुणसम्पत् । तथा चाहुः—

'किं त्वस्ति काचिदपरैव पदानुपूर्वी यस्यां न किञ्चिदपि किञ्चिदिवावभाति ।
आनन्दयत्यथ च कर्णपथं प्रयाता चेतः सतामम्रतवृष्टिरिव प्रविष्टा ॥
वचसि यमधिगम्य स्पन्दते वाचकश्रीर्वितथमपि तथात्वं यत्र वस्तु प्रयाति ।
उदयति हि स तादृक्कापि वैदर्भरीतौ सहृदयहृदयानां रञ्जकः कोऽपि पाकः' ॥

सापि वैदर्भी,—तात्स्थ्यात् ॥ २२ ॥

सापि इयमर्थगुणसम्पद्वैदर्भीत्युक्ता । तात्स्थ्यात् इति उपचारतो व्यवहारं दर्शयति ।

इति काव्यालङ्कारसूत्रवृत्तौ शारीरे प्रथमेऽधिकरणे द्वितीयोऽध्यायः ।
अधिकारचिन्ता रीतिनिश्चयश्च ।

———

तृतीयोऽध्यायः ।

रीतितत्त्वं निरूप्य काव्याङ्गानि उपदर्शयितुमाह—

लोको विद्या प्रकीर्णं च काव्याङ्गानि ॥ १ ॥

उद्देशक्रमेण एतद् व्याचष्टे—

लोकवृत्तं लोकः ॥ २ ॥

लोकः स्थावरजङ्गमात्मा तस्य वर्णनं वृत्तमिति ।

शब्दस्मृत्यभिधानकोषच्छन्दोविचितिकला-कामशास्त्रदण्डनीतिपूर्वा विद्या ॥ ३ ॥

शब्दस्मृत्यादीनां तत्पूर्वकत्वं पूर्वं काव्यबन्धेषु अपेक्षणीयत्वात् ।

तासां काव्याङ्गत्वं योजयितुमाह—

शब्दस्मृतेः शब्दशुद्धिः ॥ ४ ॥

शब्दस्मृतेर्व्याकरणाच्छब्दानां शुद्धिः साधुत्वनिश्चयः कर्त्तव्यः । शुद्धानि हि पदानि निःशङ्कैः कविभिः प्रयुज्यन्ते ।

अभिधानकोषतः पदार्थनिश्चयः ॥ ५ ॥

पदं हि रचनाप्रवेशयोग्यं भावयन् सन्दिग्धार्थत्वेन न गृह्णीयात् न वा जह्यादिति काव्यबन्धविघ्नः। तस्मात् अभिधानकोषतः पदार्थनिश्चयः कर्त्तव्य इति अपूर्वाभिधानलाभार्थत्वं तु अयुक्तम् अभिधानकोषस्य । अप्रयुक्तस्य अप्रयोज्यत्वात् । यदि प्रयुक्तं प्रयुज्यते तर्हि किमिति सन्दिग्धार्थत्वम् आशङ्कितं पदस्य ? तन्न,—तत्र सामान्येन अर्थावगतिः

सम्भवति। यथा नीवीशब्देन जघनवस्त्रग्रन्थिः उच्यत इति कस्यचित् निश्चयः। स्त्रिया वा पुरुषस्य वेति संशयो 'नीवी संग्रथनं नार्य्या जघनस्थस्य वाससः' इति नाममालाप्रतीकम् अपश्यत इति। अथ कथं

'केनचित्पूर्वमुक्तोऽपि नीविबन्धः श्लथीकृतः।
विचित्रभोजनाभोगवर्धमानोदरादिना॥'

इति प्रयोगः। भ्रान्तेरुपचाराद्वा।

छन्दोविचितेर्वृत्तसंशयच्छेदः॥ ६॥

काव्याभ्यासात् वृत्तसंक्रान्तिर्भवति एव। किन्तु मात्रा-वृत्तादिषु क्वचित् संशयः स्यात्। अतो वृत्तसंशयच्छेद-श्छन्दोविचितिर्विधेय इति।

कलाशास्त्रेभ्यः कलातत्त्वस्य संवित्॥ ७॥

कला गीतनृत्यचित्रादिकास्तासाम् अभिधायकानि शास्त्राणि विशाखिलादिप्रणीतानि कलाशास्त्राणि तेभ्यः कलातत्त्वस्य संवित्संवेदनम्। नहि कलातत्त्वानुपलब्धौ कलावस्तु सम्यङ्निबद्धुं शक्यमिति।

कामशास्त्रतः कामोपचारस्य॥ ८॥

संविदत्यनुवर्त्तते। कामोपचारस्य संवित्कामशास्त्रत इति कामोपचारबहुलं हि वस्तु काव्यस्य इति।

दण्डनीतेर्नयापनययोः॥ ९॥

दण्डनीतिः अर्थशास्त्रान्नयस्य अपनयस्य च संविदिति। तत्र षाड्गुण्यस्य यथावत्प्रयोगो नयः। तद्विपरीतोऽपनयः।

नहि तावविज्ञाय नायकप्रतिनायकयोर्वृत्तं शक्यं काव्ये निबद्धुमिति ।

दूतिवृत्तकुटिलत्वं च ततः ॥ १० ॥

इतिहासादिरितिवृत्तं काव्यशरीरम् । तस्य कुटिलत्वं ततो दण्डनीतेर्बलीयस्त्वाबलीयस्त्वादिप्रयोगो व्युत्पत्तिमूलत्वात्तस्याः । एवमन्यासामपि विद्यानां यथास्वमुपयोगो वर्णनीय इति ।

लक्ष्यज्ञत्वमभियोगो वृद्धसेवावेक्षणं प्रतिभानमवधानं च प्रकीर्णम् ॥ ११ ॥

तत्र काव्यपरिचयो लक्ष्यज्ञत्वम् ॥ १२ ॥

अन्येषां काव्येषु परिचयो लक्ष्यज्ञत्वम् । ततो हि काव्यबन्धस्य व्युत्पत्तिर्भवति ।

काव्यबन्धोद्यमोऽभियोगः ॥ १३ ॥

काव्यस्य बन्धनं रचना काव्यबन्धः । तत्रोद्यमोऽभियोगः । स हि कवित्वप्रकर्षमवसंदधाति ।

काव्योपदेशगुरुशुश्रूषणं वृद्धसेवा ॥ १४ ॥

काव्योपदेशे गुरव उपदेष्टारः । तेषां शुश्रूषणं वृद्धसेवा । ततः काव्यविद्यायाः संक्रान्तिर्भवति ।

पदाधानोद्धरणमवेक्षणम् ॥ १५ ॥

पदस्याधानं न्यासः । उद्धरणमपसारणम् । तयोः खलु अवेक्षणम् ।

अत्र श्लोकौ—"आधानोद्धरणे तावद्यावद्दोलायते मनः।
पदस्य स्थापिते स्थैर्ये हन्त सिद्धा सरस्वती ॥
यत्पदानि त्यजन्त्येव परिवृत्तिसहिष्णुताम्।
तं शब्दन्यासनिष्णाताः शब्दपाकं प्रचक्षते ॥"

कवित्वबीजं प्रतिभानम् ॥ १६ ॥

कवित्वस्य बीजं कवित्वबीजं जन्मान्तरागतसंस्कारविशेषः कश्चित्। यस्माद्बीजं विना काव्यं न निष्पद्यते। निष्पन्नं वावहास्यायतनं स्यात्।

चित्तैकाग्र्यमवधानम् ॥ १७ ॥

चित्तस्य एकाग्र्यं बाह्यार्थनिवृत्तिः। तदवधानम्। अवहितं हि चित्तमर्थान् पश्यति।

तद्देशकालाभ्याम् ॥ १८ ॥

तदवधानं देशात्कालाच्च समुत्पद्यते।

कौ पुनर्देशकालावित्याह—

विविक्तो देशः ॥ १९ ॥

विविक्तो निर्जनः।

रात्रियामस्तुरीयः कालः ॥ २० ॥

रात्रेर्यामो रात्रियामः प्रहरस्तुरीयश्चतुर्थः काल इति। तद्वशाद्विषयोपरतं प्रसन्नं चित्तमवधत्ते।

एवं काव्याङ्गानि उपदर्श्य काव्यविशेषकथनार्थमाह—

काव्यं गद्यं पद्यं च ॥ २१ ॥

गद्यस्य पूर्वं निर्देशो दुर्लक्ष्यविषयत्वेन दुर्बन्धत्वात्। यथाहुः—'गद्यं कवीनां निकषं वदन्ति'।

तच्च त्रिधा भिन्नमिति दर्शयितुमाह—

गद्यं वृत्तगन्धि चूर्णमुत्कलिकाप्रायं च ॥ २२ ॥

तल्लक्षणानि आह—

पद्यभागवद्वृत्तगन्धि ॥ २३ ॥

पद्यस्य भागाः पद्यभागास्तद्वद्वृत्तगन्धि ।

यथा—'पातालतालुतलवासिषु दानवेषु' इति ।

अत्र हि वसन्ततिलकाख्यस्य वृत्तस्य भागः प्रत्यभिज्ञायते ।

अनाविद्धललितपदं चूर्णम् ॥ २४ ॥

अनाविद्धानि अदीर्घसमासानि ललितानि अनुद्धतानि पदानि यस्मिन् तदनाविद्धललितपदं चूर्णमिति ।

यथा—'अभ्यासो हि कर्मणां कौशलमावहति । नहि सकृन्निपातमात्रेण उदबिन्दुरपि ग्रावणि निम्नतामादधाति' ।

विपरीतमुत्कलिकाप्रायम् ॥ २५ ॥

विपरीतमाविद्धोद्धतपदमुत्कलिकाप्रायम् ।

यथा—'कुलिशशिखरखरनखरप्रचयप्रचण्डचपेटापाटितमत्तमातङ्गकुम्भस्थलगलन्मदच्छटाच्छुरितचारुकेशरभारभासुरमुखे केसरिणि' इति ।

पद्यमनेकभेदम् ॥ २६ ॥

पद्यं खलु अनेकेन समार्द्धसमविषमादिना भेदेन भिन्नं भवति ।

तदनिबद्धं निबद्धं च ॥ २७ ॥

तदिदं गद्यपद्यरूपं काव्यमनिबद्धं निबद्धं च । अनयोः प्रसिद्धत्वात् लक्षणं नोक्तम् ।

क्रमसिद्धिस्तयोः स्रगुत्तंसवत् ॥ २८ ॥

तयोरिति अनिबद्धं निबद्धं च परामृश्यते । क्रमेण

सिद्धिः क्रमसिद्धिः। अनिबद्धसिद्धौ निबद्धसिद्धिः स्रगुत्तंसवत्। यथा स्रजि मालायां सिद्धायाम् उत्तंसः शेखरः सिध्यतीति।

केचित् अनिबद्ध एव पर्य्यवसितास्तद्दूषणार्णमाह—

नानिबद्धं चकास्त्येकतेजः परमाणुवत् ॥ २९ ॥

न खलु अनिबद्धं काव्यं चकास्ति दीप्यते। यथा एकतेजः परमाणुः इति।

अत्र श्लोकः—'असङ्कलितरूपाणां काव्यानां नास्ति चारुता।
न प्रत्येकं प्रकाशन्ते तैजसाः परमाणवः॥'

सन्दर्भेषु दशरूपकं श्रेयः ॥ ३० ॥

सन्दर्भेषु प्रबन्धेषु दशरूपकं नाटकादि श्रेयः।

कस्मात्तदाह—

तद्धि चित्रं चित्रपटवद्विशेषसाकल्यात् ॥ ३१ ॥

तद्दशरूपकं हि यस्मात् चित्रं चित्रपटवत्। विशेषाणां साकल्यात्।

ततोऽन्यभेदक्लृप्तिः ॥ ३२ ॥

ततो दशरूपकात् अन्येषां भेदानां क्लृप्तिः कल्पनमिति। दशरूपकस्य एव हि इदं सर्वं विलसितम्। यच्च कथाख्यायिके महाकाव्यम् इति तत् लक्षणं च नातीव हृदयङ्गममिति उपेक्षितमस्माभिः। तदन्यतो ग्राह्यम्।

इति काव्यालङ्कारसूत्रवृत्तौ शारीरे प्रथमेऽधिकरणे तृतीयोऽध्यायः।

काव्याङ्गानि काव्यविशेषाश्च।

समाप्तं चेदं शारीरं प्रथममधिकरणम्।

अथ दोषदर्शनं नाम द्वितीयमधिकरणम् ।

प्रथमोऽध्यायः ।

काव्यशरीरे स्थापिते काव्यसौन्दर्य्याक्षेपहेतवः त्यागाय दोषा विज्ञातव्या इति दोषदर्शनं नाम अधिकरणम् आरभ्यते ।

दोषस्वरूपकथनार्थमाह—

गुणविपर्य्ययात्मानो दोषाः ॥ १ ॥

गुणानां वक्ष्यमाणानां ये विपर्य्ययाः तदात्मानो दोषाः ।

अर्थतस्तदवगमः ॥ २ ॥

गुणस्वरूपनिरूपणात् तेषां दोषाणाम् अर्थावगमोऽर्थसिद्धिः ।

किमर्थं ते पृथक् प्रपञ्च्यन्ते इत्याह—

सौकर्य्याय प्रपञ्चः ॥ ३ ॥

सौकर्य्यार्थं प्रपञ्चो विस्तरो दोषाणाम् । उद्दिष्टलक्षणा हि दोषाः सुज्ञाता भवन्ति ।

पददोषान् दर्शयितुमाह—

दुष्टं पदमसाधु कष्टं ग्राम्यमप्रतीतमनर्थकं च ॥४

क्रमेण व्याख्यातुमाह—

शब्दस्मृतिविरुद्धमसाधु ॥ ५ ॥

शब्दस्मृत्या व्याकरणेन विरुद्धं पदमसाधु । यथा— 'अन्यकारकवैयर्थ्यम्' इति । अत्र हि 'अषष्ठ्यतृतीयास्थस्या-

न्यस्य दुगाशीराशाख्यास्थितोत्सुकीतिकारकरागच्छेषु' इति दुका भवितव्यमिति।

श्रुतिविरसं कष्टम् ॥ ६ ॥

श्रुतिविरसं श्रोत्रकटु पदं कष्टम्। तद्धि रचनागुम्फितमपि उद्वेजयति। यथा—

'अचूचुरच्चण्डि ! कपोलयोस्ते कान्तिद्रवं द्राग्विशदः शशाङ्कः।'

लोकमात्रप्रयुक्तं ग्राम्यम् ॥ ७ ॥

लोक एव यत्प्रयुक्तं पदं न शास्त्रे—,तद्ग्राम्यम्। यथा—

'कष्टं कथं रोदिति फूत्कृतेयम्।'

अन्यदपि तल्लगल्लादिकं द्रष्टव्यम्।

शास्त्रमात्रप्रयुक्तमप्रतीतम् ॥ ८ ॥

शास्त्र एव प्रयुक्तं न लोके—,तत् अप्रतीतं पदम्। यथा—

'किं भाषितेन बहुना रूपस्कन्धस्य सन्ति मे न गुणाः।
गुणानन्तरीयकं च प्रेमेति न मेऽस्त्युपालम्भः॥'

अत्र रूपस्कन्धान्तरीयकौ न लोके—,इति अप्रतीतम्।

पूरणार्थमनर्थकम् ॥ ९ ॥

पूरणमात्रप्रयोजनम् अव्ययपदम् अनर्थकम्। दण्डापूपन्यायेन पदम् अन्यदपि अनर्थकम् एव। यथा—

'उदितस्तु हासितकविनीलमयं तिमिरं निपीय किरणैः सविता।'

अत्र तुशब्दस्य पादपूरणार्थमेव प्रयोगः, न वाक्यालङ्कारार्थम्। वाक्यालङ्कारप्रयोजनं तु न अनर्थकम्। अपवादार्थमिदम्। यथा—

'न खल्विह गतागता नयनगोचरं मे गता' इति।

तथा हि खलु हन्त इति।

सम्प्रति पदार्थदोषान् आह—

अन्यार्थनेयगूढ़ार्थाश्लीलक्लिष्टानि च ॥ १० ॥

दुष्टं पदम् इति अनुवर्त्तते। अर्थतश्च वचनविपरिणामः। तेन अन्यार्थादीनि पदानि दुष्टानि इति सूत्रार्थः।

एषां क्रमेण लक्षणानि आह—

रूढिच्युतमन्यार्थम् ॥ ११ ॥

रूढिषु च्युतं रूढिम् अनपेक्ष्य यौगिकार्थमात्रोपादानात् अन्यार्थं पदम्। स्थूलत्वात् सामान्येन घटशब्दः पटशब्दार्थ इत्यादिकम् अन्यार्थं न उक्तम्। यथा—

'ते दुःखमुच्चावचमावहन्ति ये प्रस्मरन्ति प्रियसङ्गमानाम्।'

अत्र आवहतिः करोत्यर्थो धारणार्थे प्रयुक्तः, प्रस्मरतिः विस्मरणार्थः प्रकृष्टस्मरणार्थे इति।

कल्पितार्थं नेयार्थम् ॥ १२ ॥

अश्रुतार्थस्य कल्पना कल्पितार्थं नेयार्थम्। यथा—

'सपदि पङ्क्तिविहङ्गमनामभृत्तनयसंवलितं बलशालिना।
विपुलपर्वतवर्षिशितैः शरैः प्लवगसैन्यमुलूकजिता जितम् ॥'

अत्र विहङ्गमः चक्रवाकोऽभिप्रेतः तन्नामानि चक्राणि बिभ्रतीति विहङ्गमनामभृतो रथाः, पङ्क्तिरिति दशसंख्या लक्ष्यते, पङ्क्तिर्दश विहङ्गमनामभृतो रथा यस्य स पङ्क्तिविहङ्गमनामभृत् दशरथः। तस्य तनयाभ्यां रामलक्ष्मणाभ्यां संबलितं प्लवगसैन्यं जितम्। उलूकजिता इन्द्रजिता। कौशिकशब्देन इन्द्रोलूकयोरभिधानम् इति कौशिकशब्दवाच्यत्वेन इन्द्र उलूक उक्तः। ननु चैवं रथाङ्गनामप्रयोगोऽनुपपन्नः न तेषां निरूढ़लक्षणत्वात्।

अप्रसिद्धार्थप्रयुक्तं गूढार्थम् ॥ १३ ॥

यस्य पदस्य लोकेऽर्थः प्रसिद्धश्च अप्रसिद्धश्च तत् अप्रसिद्धेऽर्थे प्रयुक्तं गूढार्थम्। यथा—

'सहस्रगोरिवानीकं दुःसहं भवतः परैः' इति।

सहस्रं गावोऽक्षीणि यस्य स सहस्रगुः इन्द्रः। तस्य इव इति गोशब्दस्य अक्षिवाचित्वं कविषु अप्रसिद्धमिति।

असभ्यार्थान्तरमसभ्यस्मृतिहेतुश्चाश्लीलम् ॥१४॥

यस्य पदस्य अनेकार्थस्य एकोऽर्थोऽसभ्यः स्यात् तत् असभ्यार्थान्तरम्। यथा—'वर्चः' इति पदं तेजसि विष्ठायां च।

यत्तु पदम् एकदेशद्वारेण असभ्यार्थं स्मारयति तत् असभ्यस्मृतिहेतुः। यथा—'कृकाटिका' इति।

न गुप्तलक्षितसंवृतानि ॥ १५ ॥

अपवादार्थमिदम्। गुप्तं लक्षितं संवृतं च न अश्लीलम्। एषां लक्षणान्याह—

अप्रसिद्धासभ्यं गुप्तम् ॥ १६ ॥

अप्रसिद्धासभ्यार्थान्तरं पदम् अप्रसिद्धासभ्यम्। तद् गुप्तम्। यथा—'संबाधः' इति पदम्। तद्धि सङ्कटार्थं प्रसिद्धम्, न गुह्यार्थमिति।

लाक्षणिकासभ्यान्वितं लक्षितम् ॥ १७ ॥

तत् एव असभ्यार्थान्तरं लाक्षणिकेन असभ्येन अर्थेन अन्वितं पदं लक्षितम्। यथा—'जन्मभूमिः' इति।

तद्धि लक्षणया गुह्यार्थम्, न स्वशक्त्येति।

लोकसंवीतं संवृतम् ॥ १८ ॥

लोकेन संवीतं लोकसंवीतं यत्तत् संवृतम्। यथा— 'सुभगा' 'भगिनी' 'उपस्थानम्' 'अभिप्रेतम्' 'कुमारी' 'दोहदम्' इति।

अत्र हि श्लोकः—'संवीतस्य हि लोकेन न दोषान्वेषणं क्षमम्।
शिवलिङ्गस्य संस्थाने कस्यासभ्यत्वभावना॥'

तत्त्रैविध्यम्,—व्रीड़ाजुगुप्सामङ्गलातङ्कदायि-भेदात् ॥ १९ ॥

तस्य अश्लीलस्य त्रैविध्यं भवति। व्रीड़ाजुगुप्सामङ्गलातङ्कदायिनां भेदात्। किञ्चित् व्रीड़ादायि भवति। यथा— 'वाक्चाटवम्' 'हिरण्यरेताः' इति। किञ्चित् जुगुप्सादायि भवति। यथा 'कपर्दकः' इति। किञ्चिदमङ्गलातङ्कदायि भवति। यथा 'संस्थितः' इति।

व्यवहितार्थप्रत्ययं क्लिष्टम् ॥ २० ॥

अर्थस्य प्रतीतिरर्थप्रत्ययः। स व्यवहितो यस्मात् भवति तत् अव्यवहितार्थप्रत्ययं क्लिष्टम्। यथा—

'दक्षात्मजादयितवल्लभवेदिकानां ज्योत्स्नाजुषां जललवास्तरलं पतन्ति॥'

दक्षात्मजाः ताराः तासां दयितो दक्षात्मजादयितः चन्द्रः तस्य वल्लभाः चन्द्रकान्ताः तद्वेदिकानामिति। अत्र हि व्यवधानेन अर्थप्रत्ययः।

अरूढ़ार्थत्वात् ॥ २१ ॥

अरूढार्थत्वेऽपि यतोऽर्थप्रत्ययो झटिति न, तत् क्लिष्टम्।

यथा—'काञ्चीगुणस्थानमनिन्दितायाः' इति।'

अन्त्याभ्यां वाक्यं व्याख्यातम् ॥ २२ ॥

अश्लीलं क्लिष्टं च इति अन्त्ये पदे। ताभ्यां वाक्यं व्याख्यातम्। तदपि अश्लीलं क्लिष्टं च भवति। अश्लीलं यथा—

'न सा धनोन्नति र्या स्यात् कलत्रसुखदायिनी।'

'परार्थवद्धकक्षाणां यत्सत्यं पेलवं धनम् ॥'

'सोपानपथमुत्सृज्य वायुवेगसमुद्यतम्।
महापथेन गतवान् कोर्त्यमानगुणो जनैः ॥'

क्लिष्टं यथा—'धम्मिल्लस्य न कस्य प्रेक्ष्य निकामं कुरङ्गशावाक्ष्याः।
रज्यत्यपूर्वबन्धव्युत्पत्तेर्मानसं शोभाम् ॥'

एतान् पञ्च पदार्थदोषान् विभक्तान् ज्ञात्वा कविस्त्यजेत् इति तात्पर्य्यार्थः।

इति काव्यालङ्कारसूत्रवृत्तौ दोषदर्शने द्वितीयेऽधिकरणे प्रथमोऽध्यायः।
पदपदार्थदोषविभागः।

द्वितीयोऽध्यायः।

इदानीं वाक्यदोषान् दर्शयितुमाह—

भिन्नवृत्तयतिभ्रष्टविसन्धीनि वाक्यानि ॥ १ ॥

दुष्टानि इत्यभिसम्बन्धः। क्रमेण व्याचष्टे—

स्वलक्षणच्युतवृत्तं भिन्नवृत्तम् ॥ २ ॥

स्वस्मात् लक्षणात् च्युतं वृत्तं यस्मिन् तत् स्वलक्षणच्युतवृत्तं वाक्यं भिन्नवृत्तम्। यथा—

'अयि पश्यसि सौधमाश्रितामविरलसुमनोमालभारिणीम्।'

वैतालीययुग्मपादे लघ्वक्षराणां षण्णां नैरन्तर्यं निषिद्धम्। तच्च कृतमिति भिन्नवृत्तत्वम्।

विरसविरामं यतिभ्रष्टम् ॥ ३ ॥

विरसः श्रुतिकटुर्विरामो यस्मिन् तद्विरसविरामं यतिभ्रष्टम्।

तद्धातुनामभागभेदे स्वरसन्ध्यकृते प्रायेण ॥ ४ ॥

तत् यतिभ्रष्टं धातुभागभेदे नामभागभेदे च सति भवति। स्वरसन्धिनाकृते प्रायेण बाहुल्येन। धातुभागभेदे मन्दाक्रान्तायां यथा—

'एतासां राजति सुमनसां दाम कण्ठावलम्बि।'

नामभागभेदे शिखरिण्यां यथा—

'कुरङ्गाक्षीणां गण्डतलफलके स्वेदविसरः।'

मन्दाक्रान्तायां यथा—

'दुर्दर्शश्चक्रशिखिकपिशः शार्ङ्गिणो बाहुदण्डः।'

धातुनामभागपदग्रहणात् तद्भागातिरिक्तभेदे न भवति यतिभ्रष्टत्वम्। यथा मन्दाक्रान्तायाम्—

'शोभां पुष्यत्ययमभिनवः सुन्दरीणां प्रबोधः।'

अन्ये तु पदान्त एव प्रतिसिध्यन्ति पदं च विभक्त्यन्तम्।

यथा—'निकामं क्षामाङ्गी सरसकदलीगर्भसुभगा
कलाशेषा मूर्त्तिः शशिन इव नेत्रोत्सवकरी।
अवस्थामापन्ना मदनदहनोद्दामविधुरा
प्रियं नः कल्याणी रमयति मनः कम्पयति च॥'

शिखरिण्यां यथा—

'विनिद्रः श्यामान्तेष्वधरपुटसीत्कारविरुतैः।'

स्वरसन्ध्यकृत इति वचनात् स्वरसन्धिकृते भेदे न दोषः।

यथा—'किञ्चिद्भावालसमसरलं प्रेक्षितं सुन्दरीणाम्।'

न वृत्तदोषात्पृथग् यतिदोषः,—वृत्तस्य यत्यात्मकत्वात् ॥ ५ ॥

वृत्तदोषात् पृथक् यतिदोषो न वक्तव्यः। वृत्तस्य यत्यात्मकत्वात्।

यत्यात्मकं हि वृत्तमिति भिन्नवृत्त एव यतिभ्रष्टस्य अन्तर्भावान्न पृथग्ग्रहणं कार्य्यमत आह—

न, लक्ष्मणः पृथक्त्वात् ॥ ६ ॥

नायं दोषः लक्ष्मणो लक्षणस्य पृथक्त्वात्। अन्यद्धि लक्षणं वृत्तस्य, अन्यद्यतेः। गुरुलघुनियमात्मकं वृत्तम्। विरामात्मिका च यतिरिति।

विरूपपदसन्धिर्विसन्धिः ॥ ७ ॥

पदानां सन्धिः पदसन्धिः। स च स्वरसमवायरूपः प्रत्यासत्तिमात्ररूपो वा स विरूपो यस्मिन् इति विग्रहः।

पदसन्धिवैरूप्यं विश्लेषोऽश्लीलत्वं कष्टत्वं च ॥८॥

विश्लेषो विभागेन पदानां संस्थितिरिति। अश्लीलत्वम् असभ्यस्मृतिहेतुत्वम्। कष्टत्वं पारुष्यमिति। विश्लेषो यथा—

'मेघानिलेन अमुना एतस्मिन्नद्रिकानने।'

'कमले इव लोचने इमे अनुबध्नाति विलासपद्धतिः।'

'लीलालकानुबद्धानि आननानि चकासति।'

अश्लीलत्वं यथा—

'विरेचकमिदं वृत्तमाचार्य्याभ्यासयोजितम्।'

'चकासे पनसप्रायैः पुरी षण्डमहाद्रुमैः।'

'विना शपथदानाभ्यां पदवादसमुत्सुकम्।'

कष्टत्वं यथा—'मञ्जर्य्युद्गमगर्भास्ते गुर्वाभोगा द्रुमा बभुः।'

एवं वाक्यदोषान् अभिधाय वाक्यार्थदोषान् प्रतिपादयितुमाह—

व्यर्थैकार्थसन्दिग्धाप्रयुक्तापक्रमलोकविद्याविरुद्धानि च ॥ ९ ॥

वाक्यानि दुष्टानि इति सम्बन्धः।

क्रमेण व्याख्यातुमाह—

व्याहतपूर्वोत्तरार्थं व्यर्थम् ॥ १० ॥

व्याहतौ पूर्वोत्तरार्थौ यस्मिन् तत् व्याहतपूर्वोत्तरार्थं वाक्यं व्यर्थम्। यथा—

'अद्यापि स्मरति रसोल्लसत् मनो मे मुग्धायाः स्मरचतुराणि चेष्टितानि।'

मुग्धायाः कथं स्मरचतुराणि चेष्टितानि? तानि चेत् कथं मुग्धा? अत्र पूर्वोत्तरयोः अर्थयोः विरोधात् व्यर्थमिति।

उक्तार्थपदमेकार्थम् ॥ ११ ॥

उक्तार्थानि पदानि यस्मिन् तत् उक्तार्थपदमेकार्थम्। यथा—

'चिन्तामोहमनङ्गमङ्ग तनुते विश्लेषितं सुभ्रुवः।'

अनङ्गः शृङ्गारः तस्य चिन्ताया मोहात्मकत्वात् चिन्तामोहशब्दौ प्रयुक्तौ उक्तार्थौ भवतः। एकार्थपदत्वात् वाक्यम् एकार्थम् इति उक्तम्।

न, विशेषश्चेत् ॥ १२ ॥

न गतार्थं दुष्टम् विशेषः चेत् प्रतिपाद्यः स्यात्।

तं विशेषं प्रतिपादयितुमाह—

धनुर्ज्याध्वनौ धनुःश्रुतिरारूढेः प्रतिपत्त्यै ॥१३॥

धनुर्ज्याध्वनावित्यत्र ज्याशब्देन उक्तार्थत्वेऽपि धनुःश्रुतिः प्रयुज्यते। आरूढेः प्रतिपत्त्यै आरोहणस्य प्रतिपत्त्यर्थम्।

नहि धनुःश्रुतिमन्तरेण धनुषि आरूढ़ा ज्या धनुर्ज्या इति शक्यं प्रतिपत्तुम् । यथा—

'धनुर्ज्याकिणचिह्नेन दोष्णा विस्फुरितं तव' इति ।

कर्णावतंसश्रवणकुण्डलशिरःशेखरेषु कर्णादिनिर्देशः सन्निधेः ॥ १४ ॥

कर्णावतंसादिशब्देषु कर्णादीनाम् अवतंसादिपदैः उक्तार्थानामपि निर्देशः सन्निधेः प्रतिपत्त्यर्थमिति सम्बन्धः । नहि कर्णादिशब्दनिर्देशम् अन्तरेण कर्णादिसन्निहितानाम् अवतंसादीनां शक्या प्रतिपत्तिः कर्त्तुमिति । यथा—

'दोलाविलासेषु विलासिनीनां कर्णावतंसाः कलयन्ति कम्पम् ।'

'लीलाचलच्छ्रवणकुण्डलमापतन्ति ।'

'आययुर्भृङ्गमुखरशिरःशेखरशालिनः ।'

मुक्ताहारशब्दे मुक्ताशब्दः शुद्धेः ॥ १५ ॥

मुक्ताहारशब्दे मुक्ताशब्दो हारशब्देन एव गतार्थः प्रयुज्यते शुद्धेः प्रतिपत्त्यर्थमिति सम्बन्धः । शुद्धानाम् अन्यरत्नैः अमिश्रितानां हारो मुक्ताहारः । यथा—

'प्राणेश्वरपरिष्वङ्गविभ्रमप्रतिपत्तिभिः ।
मुक्ताहारेण लसता हसतीव स्तनद्वयम् ॥'

पुष्पमालाशब्दे पुष्पपदमुत्कर्षस्य ॥ १६ ॥

पुष्पमालाशब्दे मालाशब्देन एव गतार्थं पुष्पपदं प्रयुज्यते उत्कर्षस्य प्रतिपत्त्यर्थमिति । उत्कृष्टानां पुष्पाणां माला पुष्पमाला इति । यथा—

'प्रायशः पुष्पमालेव कन्या सा कं न लोभयेत् ।'

ननु मालाशब्दोऽन्यत्र अपि दृश्यते । यथा रत्नमाला

शब्दमाला इति,—सत्यम् । उपचरितस्य प्रयोगः । निरुपपदो हि मालाशब्दः पुष्परचनाविशेषमेव अभिधत्ते इति ।

करिकलभशब्दे करिशब्दस्ताद्रूप्यस्य प्रतिपत्त्यर्थम् ॥ १७ ॥

करिकलभशब्दे करिशब्दः कलभेन एव गतार्थः प्रयुज्यते ताद्रूप्यस्य प्रतिपत्त्यर्थमिति । करी प्रौढकुञ्जरः । तद्रूपः कलभः करिकलभ इति । यथा—

'त्यज करिकलभ ! त्वं प्रेमबन्धं करिण्याः ।'

विशेषणस्य च ॥ १८ ॥

विशेषणस्य विशेषप्रतिपत्त्यर्थम् उक्तार्थस्य पदस्य प्रयोगः ।

यथा—'जगाद मधुरां वाचं विशदाक्षरशालिनीम् ।'

तदिदं प्रयुक्तेषु ॥ १९ ॥

तत् इदम् उक्तं प्रयुक्तेषु न अप्रयुक्तेषु । नहि भवति यथा 'श्रवणकुण्डलम्' इति तथा 'नितम्बकाञ्ची' इत्यपि । यथा वा करिकलभः' इति तथा 'उष्ट्रकलभः' इत्यपि ।

अत्र श्लोकः—'कर्णावतंसादिपदे कर्णादिध्वनिनिर्मितिः ।
सन्निधानादिबोधार्थं स्थितेष्वेतत्समर्थनम् ॥'

संशयकृत्सन्दिग्धम् ॥ २० ॥

यद्वाक्यं साधारणानां धर्माणां श्रुतेः, विशिष्टानां वा श्रुतेः संशयं करोति तत् संशयकृत् सन्दिग्धमिति ।

यथा—'स महात्मा भाग्यवशान्महापदमुपागतः ।'

किं भाग्यवशात् महापदम् उपागत आहोस्वित् अभाग्यवशात् महतीम् आपदम् इति संशयकृद्वाक्यं प्रकरणाद्यभावे सति इति ।

मायादिकल्पितार्थमप्रयुक्तम् ॥ २१ ॥

मायादिना कल्पितोऽर्थो यस्मिन् तत् मायादिकल्पितार्थम् अप्रयुक्तम् । अत्र स्तोकम् उदाहरणम् ।

क्रमहीनार्थमपक्रमम् ॥ २२ ॥

उद्देशितानाम् अनुद्देशितानां च क्रमः सम्बन्धः तेन विहीनोऽर्थो यस्मिन् तत् क्रमहीनार्थम् अपक्रमम् ।

यथा—'कीर्त्तिप्रतापौ भवतः सूर्य्याचन्द्रमसोः समौ ।'

अत्र कीर्त्तिः चन्द्रमसः तुल्या प्रतापः सूर्य्यस्य तुल्यः, सूर्य्यस्य पूर्वनिपातात् अपक्रमः । अथवा प्रधानार्थस्य निर्देशः क्रमः, तेन विहीनोऽर्थो यस्मिन् तत् अपक्रमम् ।

यथा—'तुरङ्गमथ मातङ्गं प्रयच्छास्मै मदालसम् ।'

देशकालस्वभावविरुद्धार्थानि लोकविरुद्धानि ॥२३

देशकालस्वभावैः विरुद्धोऽर्थो येषु तानि देशकालस्वभावविरुद्धार्थानि वाक्यानि लोकविरुद्धानि । अर्थद्वारेण लोकविरुद्धत्वं वाक्यानाम् । देशविरुद्धं यथा—

'सौवीरेष्वस्ति नगरी मथुरा नाम विश्रुता ।
अचोटनालिकेराढ्या यस्याः पर्य्यन्तभूमयः ॥'

कालविरुद्धं यथा—'कदम्बकुसुमस्मेरं मधौ वनमशोभत ।'

स्वभावविरुद्धं यथा—'मत्तालिसङ्गमुखरासु च मञ्जरीषु सप्तच्छदस्य तरतीव शरन्मुखश्रीः ।'

सप्तच्छदस्य स्तवका भवन्ति न मञ्जर्य्य इति स्वभावविरुद्धम् । तथा—

'भृङ्गेण कलिकाकोषस्तथा भृशमपीड्यत ।
यथा गोष्पदपूरं हि ववर्ष बहुलं मधु ॥'

कलिकायाः सर्वस्या मकरन्दस्य एतावत् बाहुल्यं स्वभाव-विरुद्धम् ।

कलाचतुर्वर्गशास्त्रविरुद्धार्थानि विद्याविरुद्धानि॥२४

कलाशास्त्रैः चतुर्वर्गशास्त्रैश्च विरुद्धोऽर्थो येषु तानि कलाचतुर्वर्गशास्त्रविरुद्धार्थानि वाक्यानि विद्याविरुद्धानि । वाक्यानां विरोधोऽर्थद्वारकः ।

कलाशास्त्रविरुद्धं यथा—

'कालिङ्गं लिखितमिदं वयस्य पत्रं पत्रज्ञैरपतितकोटिकण्टकाग्रम् ।'

कालिङ्गं पतिताग्रकोटिकण्टकम् इति पत्रविदाम् आम्नायः । तद्विरुद्धत्वात् कलाशास्त्रविरुद्धम् । एवं कलान्तरेषु अपि विरोधोऽभ्यूह्यः ।

चतुर्वर्गशास्त्रविरुद्धानि तु उदाह्रियन्ते—

'कामोपभोगसाफल्यफलो राज्ञां महीजयः ।'

धर्मफलोऽश्वमेधादियज्ञफलो वा राज्ञां महीजय इति आगमः । तद्विरोधात् धर्मशास्त्रविरुद्धार्थम् एतद्वाक्यमिति ।

'अहङ्कारेण जीयन्ते द्विषन्तः किं नयश्रिया ।'

द्विषज्जयस्य नयमूलत्वं स्थितं दण्डनीतौ । तद्विरोधात् अर्थशास्त्रविरुद्धार्थं वाक्यमिति ।

'दशनाङ्कपविचितोत्तरोष्ठं रतिखेदालसमाननं स्मरामि ।'

'उत्तरोष्ठमन्तर्मुखं नयनान्तमिति मुक्त्वा चुम्बननखरदशनस्थानानि ।'

इति कामशास्त्रे स्थितम् । तद्विरोधात् कामशास्त्र-विरुद्धार्थं वाक्यमिति ।

'दैवताभक्तितो मुक्तिर्न तत्त्वज्ञानसम्पदा ।'

एतस्यार्थस्य मोक्षशास्त्रे स्थितत्वात् तद्विरुद्धार्थम् ।

एते वाक्यवाक्यार्थदोषास्त्यागाय ज्ञातव्याः । ये तु अन्ये शब्दार्थदोषाः सूक्ष्माः ते गुणविवेचन एव उच्यन्ते । उपमादोषाः उपमाविचारे ।

इति काव्यालङ्कारसूत्रवृत्तौ दोषदर्शने द्वितीयेऽधिकरणे द्वितीयोऽध्यायः ।

वाक्यवाक्यार्थदोषविभागः ।

समाप्तं चेदं दोषदर्शनं नाम द्वितीयमधिकरणम् ।

अथ गुणविवेचनं नाम तृतीयमधिकरणम् ।

प्रथमोऽध्यायः ।

यद्विपर्य्ययात्मनो दोषास्तान् गुणान् विचारयितुं गुणविवेचनमधिकरणमारभ्यते—

तत्र ओजःप्रसादादयो गुणाः, यमकोपमादयस्तु अलङ्कारा इति स्थितिः काव्यविदाम् । तेषां किं भेदनिबन्धनम् इत्याह—

काव्यशोभायाः कर्त्तारो धर्मा गुणाः ॥ १ ॥

ये खलु शब्दार्थयोर्धर्माः काव्यशोभां कुर्वन्ति ते गुणाः । ते च ओजःप्रसादादयः । न यमकोपमादयः । कैवल्येन तेषाम् अकाव्यशोभाकरत्वात् । ओजःप्रसादादीनां तु केवलानामस्ति काव्यशोभाकरत्वमिति ।

तदतिशयहेतवस्त्वलङ्काराः ॥ २ ॥

तस्याः काव्यशोभाया अतिशयः तदतिशयः तस्य हेतवः । तुशब्दो व्यतिरेके । अलङ्काराश्च यमकोपमादयः ।

अत्र श्लोकौ—

'युवतेरिव रूपमङ्ग काव्यं स्वदते शुद्धगुणं तदप्यतीव ।
विहितप्रणयं निरन्तराभिः सदलङ्कारविकल्पकल्पनाभिः ॥
'यदि भवति वचश्च्युतं गुणेभ्यो वपुरिव यौवनवन्ध्यमङ्गनायाः ।
अपि जनदयितानि दुर्भगत्वं नियतमलङ्करणानि संश्रयन्ते ॥'

पूर्वे नित्याः ॥ ३ ॥

पूर्वे गुणा नित्याः । तैः विना काव्यशोभानुपपत्तेः ।

एवं गुणालङ्काराणां भेदं दर्शयित्वा शब्दगुणनिरूपणार्थमाह—

ओजःप्रसादश्लेषसमतासमाधिमाधुर्य्यसौकुमार्य्योदारतार्थव्यक्तिकान्तयो बन्धगुणाः ॥ ४ ॥

बन्धः पदरचना । तस्य गुणा बन्धगुणा ओजःप्रभृतयः ।

तान् क्रमेण दर्शयितुम् आह—

गाढ़बन्धत्वमोजः ॥ ५ ॥

बन्धस्य गाढ़त्वं यत्तत् ओजः ।

यथा—'विलुलितमकरन्दा मञ्जरीर्नर्त्तयन्ति ।' न पुनः, विलुलितमधुधारा मञ्जरीर्लोलयन्ति ।'

शैथिल्यं प्रसादः ॥ ६ ॥

बन्धस्य शैथिल्य' शिथिलत्वं प्रसादः ।

ननु अयम् ओजोविपर्य्ययात्मा दोषः, तत्कथं गुण इत्याह—

गुणः संप्लवात् ॥ ७ ॥

गुणः प्रसादः । ओजसा सह संप्लवात् ।

न शुद्धः ॥ ८ ॥

स शुद्धस्तु दोष एवेति ।

ननु विरुद्धयोः ओजःप्रसादयोः कथं संप्लव इत्याह—

स त्वनुभवसिद्धः ॥ ९ ॥

स तु संप्लवस्तु अनुभवसिद्धः तद्विदां रत्नादिविशेषवत् ।

अत्र श्लोकः—'करुणप्रेक्षणीयेषु संप्लवः सुखदुःखयोः ।
यथानुभवतः सिद्धस्तथैवौजःप्रसादयोः ॥'

साम्योत्कर्षौ च ॥ १० ॥

साम्यमुत्कर्षश्च ओजःप्रसादयोः अनुभवादेव ।

साम्यं यथा—'अथ स विषयव्यावृत्तात्मा यथाविधि सूनवे नृपतिककुदं दत्त्वा यूने सितातपवारणम् ।'

क्वचिदोजःप्रसादात् उत्कृष्टम् । यथा—

'व्रजति गगनं भल्लातक्याः फलेन सहोपमाम् ।'

क्वचित् ओजसः प्रसादस्य उत्कर्षः । यथा—

'कुसुमशयनं न प्रत्यग्रं न चन्द्रमरीचयो न च मलयजं सर्वाङ्गीणं न वा मणियष्टयः ।'

मसृणत्वं श्लेषः ॥ ११ ॥

मसृणत्वं नाम यस्मिन् सति बहूनि अपि पदानि एकवद्भासन्ते ।

यथा—'अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः ।'

न पुनः, 'सूत्रं ब्राह्ममुरःस्थले—', 'भ्रमरीवल्गुगीतयः', 'तड़िल्लक्षिलमाकाशम्' इति । एवं तु श्लेषो भवति—'ब्राह्मं सूत्रमुरःस्थले', 'भ्रमरीमञ्जुगीतयः', 'तड़िज्जटिलमाकाशं' इति ।

मार्गाभेदः समता ॥ १२ ॥

मार्गस्य अभेदो मार्गाभेदः समता । येन मार्गेण उप-

क्रमः तस्य अत्याग इत्यर्थः। श्लोके प्रबन्धे चेति। पूर्वोक्तम् उदाहरणम्। विपर्ययस्तु यथा—

'प्रसीद चण्डि ! त्यज मन्युमञ्जसा जनस्तवायं पुरतः कृताञ्जलिः।
किमर्थमुत्कम्पितपीवरस्तनद्वयं त्वया लुप्तविलासमास्यते॥'

आरोहावरोहक्रमः समाधिः॥ १३॥

आरोहावरोहयोः क्रमः आरोहावरोहक्रमः समाधिः परिहारः। आरोहस्यावरोहे सति परिहारः, अवरोहस्य आरोहे सति इति।

तत्र आरोहपूर्वोऽवरोहो यथा—

'निरानन्दः कौन्दे मधुनि परिभुक्तोज्झितरसे।'

अवरोहपूर्वस्तु आरोहो यथा—

'नराः शीलभ्रष्टा व्यसन इव मज्जन्ति तरवः।'

आरोहस्य क्रमोऽवरोहस्य च क्रम आरोहावरोहक्रमः क्रमेण आरोहणम् अवरोहणं च इति केचित्।

यथा—'निवेद्यः स्वःसिन्धोस्तुहिनगिरिवीथीषु जयति।'

न पृथक्, आरोहावरोहयोरोजःप्रसादरूपत्वात्॥ १४

न पृथक्समाधिर्गुणः। आरोहावरोहयोः ओजःप्रसादरूपत्वात्। ओजोरूपश्च आरोहः प्रसादरूपश्च अवरोह इति।

न, संपृक्तत्वात्॥ १५॥

यदुक्तम् ओजःप्रसादरूपत्वम् आरोहावरोहयोः तन्न। संपृक्तत्वात्। संपृक्तौ खलु ओजःप्रसादौ नदीवेणिकावत् वहतः।

अनैकान्त्याच्च ॥ १६ ॥

न चायमेकान्तः यत् ओजस्य आरोहः, प्रसादे चावरोह इति।

ओजःप्रसादयोः क्वचिद्भागे तीव्रावस्थायां ताविति चेदभ्युपगमः ॥ १७ ॥

ओजःप्रसादयोः क्वचिद्भागे तीव्रावस्थायाम् आरोहोऽवरोहश्च इत्येवं चेत् मन्यसे अभ्युपगमः, न विप्रतिपत्तिः।

विशेषापेक्षत्वात्तयोः ॥ १८ ॥

स विशेषो गुणान्तरात्मा।

आरोहावरोहनिमित्तं समाधिराख्यायते ॥१९॥

आरोहावरोहक्रमः समाधिरिति गौण्या वृत्त्या व्याख्येयम्।

क्रमविधानार्थत्वाद्वा ॥ २० ॥

पृथक्करणमिति। पाठधर्मत्वं च न सम्भवति इति 'न पाठधर्माः सर्वत्रादृष्टेः' इत्यत्र वक्ष्यामः।

पृथक्पदत्वं माधुर्य्यम् ॥ २१ ॥ ✓

बन्धस्य पृथक् पदत्वं यत्तत् माधुर्य्यम्। पृथक् पदानि यस्य स पृथक्पदः तस्य भावः पृथक्पदत्वम्। समासदैर्घ्यविनिवृत्तिपरं च एतत्। पूर्वोक्तम् उदाहरणम्।

विपर्य्ययस्तु यथा—

'चलितशबरसेनादत्तगोशृङ्गचण्डध्वनिचकितवराहव्याकुला विन्ध्यपादाः।'

अजरठत्वं सौकुमार्य्यम् ॥ २२ ॥ ✓

बन्धस्याजरठत्वम् अपारुष्यं यत्तत् सौकुमार्य्यम् । पूर्वोक्तम् उदाहरणम् ।

विपर्य्ययस्तु यथा—

'निदानं निर्वृतं प्रियजनसदृक्षव्यवसितिः
सुधासेकप्लोषौ फलमपि विरुद्धं मम हृदि ।'

विकटत्वमुदारता ॥ २३ ॥

बन्धस्य विकटत्वं यत् असौ उदारता । यस्मिन् सति सति नृत्यन्तीव पदानि इति जनस्य वर्णना भवति तद्विकटत्वम् । लीलायमानत्वमित्यर्थः । यथा—

'स्वचरणविनिविष्टैर्नूपुरैर्नर्त्तकीनां झटिति रणितमासीत् तत्र चित्रं कलं च ।'
न पुनः, 'चरणकमललग्नैर्नूपुरैर्नर्त्तकीनां झटिति रणितमासीन्मञ्जु चित्रं च तत्र ।'

अर्थव्यक्तिहेतुत्वमर्थव्यक्तिः ॥ २४ ॥

यत्र झटिति अर्थप्रतिपत्तिहेतुत्वं स गुणोऽर्थव्यक्तिरिति । पूर्वोक्तम् उदाहरणम् । प्रत्युदाहरणं तु भूयः सुलभं च ।

औज्ज्वल्यं कान्तिः ॥ २५ ॥

बन्धस्य औज्ज्वलत्वं नाम यदसौ कान्तिरिति । यदभावे पुराणच्छाया इति उच्यते ।

यथा—'कुरङ्गीनेत्रालीस्तवकितवनालीपरिसरः ।'

विपर्य्ययस्तु भूयान् सुलभश्च ।

श्लोकाश्च अत्र भवन्ति—

'पदन्यासस्य गाढ़त्वं वदन्त्योजः कवीश्वराः ।
अनेनाधिष्ठिताः प्रायः शब्दाः श्रोत्ररसायनम् ॥
श्लथत्वमोजसा मिश्रं प्रसादं च प्रचक्षते ।
अनेन न विना सत्यं स्वदते काव्यपद्धतिः ॥

यत्रैकपदवद्भावः पदानां भूयसामपि ।
अनालक्षितसन्धीनां स श्लेषः परमो गुणः ॥
प्रतिपाद्यं प्रतिश्लोकमेकमार्गपरिग्रहः ।
दुर्बन्धो दुर्विभावश्च समतेति मतो गुणः ॥
आरोहन्त्यवरोहन्ति क्रमेण यतयो हि यत् ।
समाधिर्नाम स गुणस्तेन पूता सरस्वती ॥
बन्धे पृथक्पदत्वं च माधुर्यमुदितं बुधैः ।
अनेन हि पदन्यासाः कामं धारामधुश्च्युतः ॥
यथा हि छिद्यते रेखा चतुरं चित्रपण्डितैः ।
तथैव वागपि प्राज्ञैः समस्तगुणगुम्फिता ॥
बन्धस्याजरठत्वं च सौकुमार्यमुदाहृतम् ।
एतेन वर्जिता वाचो रूक्षत्वान्न श्रुतिक्षमाः ॥
विकटत्वं च बन्धस्य कथयन्ति ह्युदारताम् ।
वैचित्र्यं न प्रपद्यन्ते यया शून्याः पदक्रमाः ॥
पश्चादिव गतिर्वाचः पुरस्तादिव वस्तुनः ।
यत्रार्थव्यक्तिहेतुत्वात्सोऽर्थव्यक्तिः स्मृतो गुणः ॥
औज्ज्वल्यं कान्तिरित्याहुर्गुणं गुणविशारदाः ।
पुराणचित्रस्थानीयं तेन वन्ध्यं कवेर्वचः ॥'

नासन्तः, संवेद्यत्वात् ॥ २६ ॥

न खलु एते गुणा असन्तः । संवेद्यत्वात् ।
तद्विदां संवेद्यत्वेऽपि भ्रान्ताः स्युः इत्याह—

न भ्रान्ताः, निष्कम्पत्वात् ॥ २७ ॥

न गुणा भ्रान्ताः । एतद्विषयायाः प्रवृत्तेर्निष्कम्पत्वात् ।

न पाठधर्माः, सर्वत्रादृष्टेः २८ ॥

न एते गुणाः पाठधर्माः । सर्वत्र अदृष्टेः । यदि पाठधर्माः स्युः तर्हि विशेषानपेक्षाः सन्तः सर्वत्र दृश्येरन् । न

च सर्वत्र दृश्यन्ते। विशेषापेक्षया विशेषाणां गुणत्वात् गुणाभ्युपगम एव इति ।

इति काव्यालङ्कारसूत्रवृत्तौ गुणविवेचने तृतीयेऽधिकरणे प्रथमोऽध्यायः ।

गुणालङ्कारविवेकः शब्दगुणविवेकश्च ।

द्वितीयोऽध्यायः ।

सम्प्रति अर्थगुणविवेचनार्थम् आह—

त एवार्थगुणाः ॥ १ ॥

त एव ओजःप्रभृतयोऽर्थगुणाः ।

शब्दार्थगुणानां वाच्यवाचकद्वारेण भेदं दर्शयति—

अर्थस्य प्रौढ़िरोजः ॥ २ ॥

अर्थस्याभिधेयस्य प्रौढ़िः प्रौढ़त्वमोजः ।

'पदार्थे वाक्यवचनं वाक्यार्थे च पदाभिधा ।
प्रौढ़िर्व्यासमासौ च साभिप्रायत्वमस्य च ॥'

पदार्थे वाक्यवचनं यथा—

'अथ नयनसमुत्थं ज्योतिरत्रेरिव द्यौः ।'

अत्र चन्द्रपदवाक्येऽर्थे 'नयनसमुत्थं ज्योतिरत्रेः' इति वाक्यं प्रयुक्तम्। पदसमूहस्य वाक्यमभिप्रेतम्। अनया दिशा अन्यदपि द्रष्टव्यम् ।

तद्यथा—'पुरः पाण्डुच्छायं तदनु कपिलिम्ना कृतपदं
ततः पाकोत्सेकादरुणमणिसंसर्गितवपुः ।
शनैः शेषारम्भे स्थपुटनिजविष्कम्भविषमं
वने वीतामोदं बदरमरसत्वं कलयति ॥'

न च एवमतिप्रसङ्गः। काव्यशोभाकरत्वस्य गुणसामान्य-लक्षणस्य अवस्थितत्वात्।

वाक्यार्थे पदाभिधानं यथा—

'दिव्येयं न भवति किं तर्हि मानुषी इति वक्तव्ये 'निमिषति' इत्याहेति।

अस्य वाक्यार्थस्य व्याससमासौ। व्यासो यथा—

'अयं नानाकारो भवति सुखदुःखव्यतिकरः
सुखं वा दुःखं वा भवति न भवत्येव च ततः।
पुनस्तस्मादूर्ध्वं भवति सुखदुःखं किमपि तत्
पुनस्तस्मादूर्ध्वं भवति न च दुःखं न च सुखम्॥'

समासो यथा—

'ते हिमालयमामन्त्र्य पुनः प्रेक्ष्य च शूलिनम्।
सिद्धं चास्मै निवेद्यार्थं तद्विसृष्टाः खमुद्ययुः॥'

साभिप्रायत्वं यथा—

'सोऽयं सम्प्रति चन्द्रगुप्ततनयश्चन्द्रप्रकाशो युवा
जातो भूपतिराश्रयः कृतधियां दिष्ट्या कृतार्थश्रमः।'

आश्रयः कृतधियामित्यस्य च सुबन्धुसाचिव्योपक्षेपपर-त्वात् साभिप्रायत्वम्।

एतेन, 'रतिविगलितबन्धे केशपाशे सुकेश्याः'

इत्यत्र च साभिप्रायत्वं व्याख्यातम्।

अर्थवैमल्यं प्रसादः॥ ३॥

अर्थस्य वैमल्यं प्रयोजकमात्रपरिग्रहः प्रसादः।

यथा—'सवर्णा कन्यका रूपयौवनारम्भशालिनी।'

विपर्ययस्तु—'उपास्तां हस्तो मे विमलमणिकाञ्चीपदमिदम्।'

काञ्चीपदमित्यनेन एव नितम्बस्य लक्षितत्वात् विशेषणस्य अप्रयोजकत्वमिति ।

घटना श्लेषः ॥ ४ ॥

क्रमकौटिल्यानुल्बणत्वोपपत्तियोगो घटना । स श्लेषः ।

यथा—'दृष्ट्वैकासनसंस्थिते प्रियतमे पश्चादुपेत्यादरात्
एकस्या नयने निमील्य विहितक्रीडानुबन्धच्छलः ।
ईषद्वक्रितकन्धरः सपुलकः प्रेमोल्लसन्मानसाम्
अन्तर्हासलसत्कपोलफलकां धूर्तोऽपरां चुम्बति ॥'

शूद्रकादिरचितेषु प्रबन्धेषु अस्य भूयान् प्रपञ्चो दृश्यते ।

अवैषम्यं समता ॥ ५ ॥

अवैषम्यं प्रक्रमाभेदः समता । क्वचित् क्रमोऽपि भिद्यते ।

यथा—'च्युतसुमनसः कुन्दाः पुष्पोद्गमेष्वलसा द्रुमा
मलयमरुतः सर्पन्तीमे वियुक्तधृतिच्छिदः ।
अथ च सवितुः शीतोल्लासं लुनन्ति मरीचयो
न च जरठतामालम्बन्ते क्लमोदयदायिनीम् ॥'

ऋतुसन्धिप्रतिपादनपरेऽत्र द्वितीये पादे क्रमभेदो मलयमरुताम् असाधारणत्वात् । एवं तु द्वितीयः पादः पठितव्यः ।

'मनसि च गिरं बध्नन्तीमे किरन्ति न कोकिलाः' इति ।

सुगमत्वं वा वैषम्यमिति ॥ ६ ॥

सुखेन गम्यते ज्ञायत इत्यर्थः ।

यथा—'अस्त्युत्तरस्यां दिशि देवतात्मा' इत्यादि । प्रत्युदाहरणं सुलभम् ।

अर्थदृष्टिः समाधिः ॥ ७ ॥

अर्थस्य दर्शनं दृष्टिः । समाधानकारणत्वात् समाधिः ।

अवहितं चित्तमर्थान् पश्यति इत्युक्तं पुरस्तात् ।

अर्थो द्विविधः, अयोनिरन्यच्छायायोनिर्वा ॥८॥

यस्य अर्थस्य दर्शनं समाधिः सोऽर्थो द्विविधः—अयोनिः, अन्यच्छायायोनिर्वेति । अयोनिरनन्यकारणः । अवधानमात्रकारण इत्यर्थः । अन्यस्य काव्यस्य छाया अन्यच्छाया तद्योनिर्वा । तद्यथा—

'अङ्गपेहि मम सीधुभाजनाद्यावदग्रदशनैर्न दश्यसे ।
चन्द्र ! मद्दशनमण्डलाङ्कितः खं न यास्यसि हि रोहिणीभयात् ॥'

'मा भैः शशाङ्क मम सीधुनि नास्ति राहुः
खे रोहिणी वसति कातर किं बिभेषि ।
प्रायो विदग्धवनितानवसङ्गमेषु
पुंसां मनः प्रचलतीति किमत्र चित्रम् ॥'

पूर्वस्य श्लोकस्य अर्थोऽयोनिः, द्वितीयस्य च च्छायायोनिरिति ।

अर्थो व्यक्तः सूक्ष्मश्च ॥ ९ ॥

यस्यार्थस्य दर्शनं समाधिरिति स द्वेधा—व्यक्तः सूक्ष्मश्च । व्यक्तः स्फुट उदाहृत एव । सूक्ष्मं व्याख्यातुमाह—

सूक्ष्मो भाव्यो वासनीयश्च ॥ १० ॥

सूक्ष्मो द्वेधा भवति—भाव्यो वासनीयश्च । शीघ्रनिरूपणागम्यो भाव्यः । एकाग्रताप्रकर्षगम्यो वासनीय इति । भाव्यो यथा—

अन्योन्यसंमिलितमांसलदन्तकान्ति
लीलासमाविरलसंवलितार्धतारम् ।

लीलागृहे प्रतिकलं किलकिञ्चितेषु
व्यावर्त्तमानविनयं मिथुनं चकास्ति ॥'

वासनीयो यथा—

'अवहित्थवलितजघनं विवर्त्तिताभिमुखकुचतटं स्थित्वा ।
अवलोकितोऽहमनया दक्षिणकरकलितहारलतम् ॥'

उक्तिवैचित्र्यं माधुर्य्यम् ॥ ११ ॥

उक्तेर्वैचित्र्यं यत्तत् माधुर्य्यमिति । यथा—

'रसवदमृतं कः सन्देहो मधून्यपि नान्यथा
मधुरमधिकं चूतस्यापि प्रसन्नरसं फलम् ।
सकृदपि पुनर्मध्यस्थः सन् रसान्तरविज्जनो
वदतु यदिहान्यत् स्वादु स्यात् प्रियादशनच्छदात् ॥'

अपारुष्यं सौकुमार्य्यम् ॥ १२ ॥

परुषेऽर्थेऽपारुष्यं सौकुमार्य्यमिति ।

यथा मृतं यशःशेष इत्याहुः । एकाकिनं देवताद्वितीयमिति । गच्छेति साधयेति च ।

अग्राम्यत्वमुदारता ॥ १३ ॥

ग्राम्यत्वप्रसङ्गेऽग्राम्यत्वम् उदारता । यथा—

'त्वमेवं सौन्दर्य्या स च रुचिरतायाः परिचितः
कलानां सीमानं परमिह युवामेव भजथः ।
अपि द्वन्द्वं दिष्ट्या तदिति सुभगत्वं वदति वा
मनः शेषं चेत् स्याज्जितमिह तदानीं गुणितया ॥'

विपर्य्ययस्तु—

'स्वपिति यावदयं निकटे जनः स्वपिमि तावदहं किमपैति ते ।
इति निगद्य शनैरनुमेखलं मम करं स्वकरेण रुरोध सा ॥'

वस्तुस्वभावस्फुटत्वमर्थव्यक्तिः ॥ १४ ॥

का०—४

वस्तूनां भावानां स्वभावस्य स्फुटत्वं यदसौ अर्थव्यक्तिः।

यथा—'पृष्ठेषु शङ्खशकलच्छविषु च्छदानां राजीभिरङ्कितमलक्तकलोहिनीभिः
गोरोचनाहरितबभ्रुबहिःपलाशमामोदते कुमुदमम्भसि पल्वलस्य॥'

यथा वा—'प्रथममलसैः पर्यस्ताग्रैः स्थितं पृथुकेसरै-
विरलविरलैरन्तःपत्रैर्मनाङ्मिलितं ततः।
तदनु वलनामात्रं किं चिद्व्यधायि बहिर्दलै-
र्मुकुलनविधौ वृद्धाब्जानां बभूव कदर्थना॥'

दीप्तरसत्वं कान्तिः॥ १५॥

दीप्ता रसाः शृङ्गारादयो यस्य स दीप्तरसः, तस्य भावो दीप्तरसत्वं कान्तिः। यथा—

'प्रेयान् सायमपाकृतः सशपथं पादानतः कान्तया
द्वित्राण्येव पदानि वासभवनाद्यावन्न यात्युन्मनाः।
तावत्प्रत्युत पाणिसम्पुटलसन्नीवीनितम्बं धृतो
धावित्वैव कृतप्रणामकमहो प्रेम्णो विचित्रा गतिः॥'

एवं रसान्तरेषु अपि उदाहरणीयमिति।

अत्र श्लोकाः—

'गुणस्फुटत्वसाकल्यं काव्यपाकं प्रचक्षते।
चूतस्य परिणामेन स चायमुपमीयते॥
सुप्तिङ्संस्कारमात्रं यत् क्लिष्टवस्तुगुणं भवेत्।
काव्यं वृन्ताकपाकं तज्जुगुप्सन्ते जनास्ततः॥
गुणानां दर्शनान्मुक्तो यस्यार्थस्तदपार्थकम्।
दाडिमानि दशेत्यादि न विचारक्षमं वचः॥'

इति काव्यालङ्कारसूत्रवृत्तौ गुणविवेचने तृतीयेऽधिकरणे द्वितीयोऽध्यायः।
अर्थगुणविवेचनम्।

समाप्तं चेदं गुणविवेचनं नाम तृतीयमधिकरणम्।

आलङ्कारिकं नाम चतुर्थमधिकरणम् ।

प्रथमोऽध्यायः ।

गुणनिर्वृत्या काव्यशोभा । तस्याश्च अतिशयहेतवोऽलङ्कारः। तन्निरूपणार्थमालङ्कारिकम् अधिकरणम् आरभ्यते—

तत्र शब्दालङ्कारौ द्वौ यमकानुप्रासौ क्रमेण दर्शयितुमाह—

पदमनेकार्थमक्षरं वावृत्तं स्थाननियमे यमकम् ॥ १

पदम् अनेकार्थं भिन्नार्थम् एकम् अनेकं वा तद्वत् अक्षरम् आवृत्तं स्थाननियमे सति यमकम् । स्वावृत्त्या सजातीयेन वा कार्त्स्न्यैकदेशाभ्यास् अनेकपादव्याप्तिः स्थाननियम इति । यानि तु एकपादभागवृत्तीनि यमकानि दृश्यन्ते तेषु श्लोकान्तरस्य संस्थानं यमकापेक्षयैव स्थाननियम इति ।

स्थानकथनार्थम् आह—

पादः पादस्यैकस्यानेकस्य चादिमध्यान्तभागाः स्थानानि ॥ २ ॥

पादः, एकस्य च पादस्य आदिमध्यान्तभागाः, अनेकस्य च पादस्य त एव स्थानानि । पादयमकं यथा—

'असज्जनवचो यस्य कलिकामधुगर्हितम् ।
तस्य न स्वादिषतरोः कलिकामधु गर्हितम् ॥'

एकपादस्य आदिमध्यान्तयमकानि यथा—

'हन्त हन्तररातीनां धौरधौ रचिता तव ।
कामं कामन्दकीनीतिरस्या रस्या दिवानिशम् ॥'

'वसुपरासु परासुमिवोज्भतीष्वविकलं विकलङ्कशशिप्रभम् ।
प्रियतमं यतमन्तमनीश्वरं रसिकता सिकतास्विव तासु का ॥
'सुदृशोऽवसरेऽचकितं चकितं भवतोचितमस्ति मितं स्तिमितम् ।
अपि हासलवस्तव कः स्तवकस्तुलयेन्न तु कामधुरां मधुराम् ॥'

पादयोः आदिमध्यान्तयमकानि यथा—

'भ्रमर ! द्रुमपुष्पाणि भ्रम रत्यै पिबन्मधु ।
का कुन्दकुसुमे प्रीतिः काकुं दत्त्वा विरौषि यत् ॥'
'अप्यशक्यं त्वया दत्तं दुःखं शक्यन्तरात्मनि ।
वाप्पी वाहीकनारीणां वेगवाही कपोलयोः ॥'
'सपदि कृतपदस्त्वदीचितेन स्मितशुचिना स्मरतत्त्वदीक्षितेन ।
भवति बत जनः सचित्तदाही न खलु मृषा कुत एव चित्तदाही ॥'

एकान्तरपादान्तयमकं यथा—

'उद्वेजयति भूतानि यस्य राज्ञः कुशासनम् ।
सिंहासनवियुक्तस्य तस्य क्षिप्रं कुशासनम् ॥'

एवम् एकान्तरपादादिमध्ययमकानि ऊह्यानि । समस्तपादान्तयमकं यथा—

'नतोन्नतभ्रूगतिबद्धलास्यां विलोक्य तन्वीं शशिपेशलास्याम् ।
मनः किमुत्ताम्यसि चञ्चलास्यां कृतो स्मराज्ञा यदि पुष्कला स्याम् ॥'

एवं समस्तपादादिमध्यान्तयमकानि व्याख्यातानि । अन्ये च सङ्करजातिभेदाः सुधिया उत्प्रेक्ष्याः ।

अक्षरयमकं तु एकाक्षरम् अनेकाक्षरं च । एकाक्षरं यथा—

'नानाकारेण कान्ताभूराराधितमनोभुवा ।
विविक्तेन विलासेन ततक्ष हृदयं नृणाम् ॥'

एवं स्थानान्तरयोगेऽपि द्रष्टव्यः । सजातीयनैरन्तर्यादस्य प्रकर्षो भवति । स चायं हरिप्रबोधे दृश्यते । यथा—

'विविधधववनानागगर्धनाना विविततगगनानाममज्जनाना ।
रुरुशशललनाना ववल्गुस्नुनाना मम हिहि ततनामाननसस्तनाना ॥'

अनया च वर्णयमकमालया पदयमकमाला व्याख्याता ।

भङ्गादुत्कर्षः ॥ ३ ॥

उत्कृष्टं खलु यमकं भङ्गात् भवति ।

शृङ्खला परिवर्त्तकचूर्णमिति भङ्गमार्गः ॥ ४ ॥

एते खलु शृङ्खलादयो यमकभङ्गानां प्रकारा भवन्ति । तान् क्रमेण व्याचष्टे—

वर्णविच्छेदचलनं शृङ्खला ॥ ५ ॥

वर्णानां विच्छेदो वर्णविच्छेदः तस्य चलनं यत् सा शृङ्खला ।

यथा—'कलिकामधुशब्दे विच्छेदः धुशब्दे च तस्य चलनम् ।' लिनवर्णयो-र्विच्छेदात् ।

सङ्गविनिवृत्तौ स्वरूपापत्तिः परिवर्त्तकः ॥ ६ ॥

अन्यवर्णसंसर्गः सङ्गः । तद्विनिवृत्तौ स्वरूपस्य अन्यरूप-तिरस्कृतस्य आपत्तिः प्राप्तिः परिवर्त्तकः ।

यथा—'कलिकामधु गर्हितम्' इति । अत्र अर्हितम् इति पदं गकारस्य व्यञ्जनस्य सङ्गाद्गर्हितम् इति अन्यस्य रूपमापन्नम् । तत्र व्यञ्जनसङ्गे विनिवृत्ते स्वरूपमापद्यते अर्हितमिति । अन्यवर्णसंक्रमेण भिन्नरूपस्य पदस्य तादृ-प्यविधिरयमिति तात्पर्य्यार्थः । एतेन इतरावपि व्याख्यातौ ।

पिण्डाक्षरभेदे स्वरूपलोपश्चूर्णम् ॥ ७ ॥

पिण्डाक्षरभेदे सति पदस्य स्वरूपलोपश्चूर्णम् । यथा—

'धीऽचलकुलमवति चलं दूरससुन्मुक्तशुक्तिमीनां कान्तः ।

साग्निं बिभर्त्ति च सलिलं दूरससुन्मुक्तशुक्तिमीनाक्रान्तः ॥'

अत्र शुक्तिपदे क्तीति पिण्डाक्षरम् । तस्य भेदे शुक्तिपदं

लुप्यते। ककारतिकारयोः अन्यत्र संक्रमात्। दूरसमुन्मुक्तशुक् अचलकुलम्, तिमीनां कान्तः समुद्रः।

श्लोकाश्च अत्र—

'अखण्डवर्णविन्यासचलनं शृङ्खला मता।
अनेन खलु भङ्गेन यमकानां विचित्रता॥'
'यदन्यसङ्गमुत्सृज्य नेपथ्यमिव नर्त्तकः।
शब्दस्वरूपमारोहेत् स ज्ञेयः परिवर्त्तकः॥'
'पिण्डाचरस्य भेदेन पूर्वापरपदाश्रयात्।
वर्णयोः पदलोपो यः स भङ्गश्चूर्णसंज्ञकः॥'
'अप्राप्तचूर्णभङ्गानि यथास्थानस्थितान्यपि।
अलकानीव नात्यर्थं यमकानि चकासति॥'
'विभक्तिपरिणामेन यत्र भङ्गः क्वचिद्भवेत्।
न तदिच्छन्ति यमकं यमकोत्कर्षकोविदाः॥'
'आरूढं भूयसा यत्तु पदं यमकभूमिकाम्।
न युज्यते पुनस्तस्य युक्तानुप्रासकल्पना॥'
'विभक्तीनां विभक्तत्वं संख्यायाः कारकस्य च।
आवृत्तिः सुप्तिङन्तानां मिथश्च यमकाद् भुतम्॥'

शेषः सरूपोऽनुप्रासः॥ ८॥

पदम् एकार्थम् अनेकार्थं च स्थानानियतं तद्विधमक्षरं च शेषः। सरूपोऽन्येन प्रयुक्तेन तुल्यरूपोऽनुप्रासः। ननु च 'शेषोऽनुप्रासः' इति एतावदेवसूत्रं कस्मान्न कृतम्, आवृत्तिशेषोऽनुप्रास इत्येव हि व्याख्यास्यते। सत्यम्। सिद्धत्येव आवृत्तिशेषे। किं तु अव्याप्तिप्रसङ्गः। विशेषार्थं च सरूपग्रहणम्। कार्त्स्न्येनैवावृत्तिः कार्त्स्न्यैकदेशाभ्यां तु सारूप्यमिति।

अनुल्बणो वर्णानुप्रासः श्रेयान्॥ ९॥

वर्णानाम् अनुप्रासः स खलु अनुल्बणो लीनः श्रेयान् ।

यथा—'क्वचिन्मसृणमांसलं क्वचिदतीव तारास्पदं
प्रसन्नसुभगं मुहुः खरतरङ्गलीलाङ्कितम् ।
इदं हि तव वल्लकीरणितनिर्गमैर्गुम्फितं
मनो मदयतीव मे किमपि साधुसङ्गीतकम् ॥'

उल्बणस्तु न श्रेयान् । यथा—

'वल्लीवद्धोर्ध्वजूटोद्भटमटति रटत्कोटिकोदण्डदण्डः' इति ।

पादानुप्रासः पादयमकवत् ॥ १० ॥

ये पादयमकस्य भेदास्ते पादानुप्रासस्य इत्यर्थः । तेषाम् उदाहरणानि यथा—

'कविराजमविज्ञाय कुतः काव्यक्रियादरः ।
कविराजं च विज्ञाय कुतः काव्यक्रियादरः ॥'

'आखण्डयन्ति मुहुरामलकीफलानि
बालानि बालकपिलोचनपिङ्गलानि ।"

'वस्त्रायन्ते नदीनां सितकुसुमधराः शक्रसङ्काश काशाः
काशाभा भान्ति तासां नवपुलिनगताः श्रीनदीहंस हंसाः ।
हंसाभाम्भोदमुक्तः स्फुरदमलरुचिर्मेदिनीचन्द्र चन्द्रः
चन्द्राङ्कः शारदस्ते जयकृदुपनतो विद्विषां काल कालः ॥"

'कुवलयदलश्यामा मेघा विहाय दिवं गताः
कुवलयदलश्यामो निद्रां विमुञ्चति केशवः ।
कुवलयदलश्यामा श्यामालताश्च विजृम्भते
कुवलयदलश्यामं चन्द्रो नभः प्रविगाहते ॥'

एवम् अन्येऽपि भेदा द्रष्टव्याः ।

इति काव्यालङ्कारसूत्रवृत्तावालङ्कारिके चतुर्थेऽधिकरणे प्रथमोऽध्यायः ।

शब्दालङ्कारविचारः ।

द्वितीयोऽध्यायः ।

सम्प्रति अर्थालङ्काराणां प्रस्तावः । तन्मूलं च उपमेति सैव विचार्य्यते—

उपमानेनोपमेयस्य गुणलेशतः साम्यमुपमा ॥१॥

उपमीयते सादृश्यमानीयते येन उत्कृष्टगुणेन अन्यस्य यत् तदुपमानम् । यत् उपमीयते सादृश्यमानीयते यत् न्यूनगुणं तदुपमेयम् । उपमानेन उपमेयस्य गुणलेशतः साम्यं यदसौ उपमेति । ननु उपमानमित्युपमेयमिति च सम्बन्धिशब्दौ एतौ तयोः एकतरोपादानेन एव अन्यतरसिद्धिरिति । यथा—'उपमितं व्याघ्रादिभिः सामान्याप्रयोगे' इत्यत्र उपमितग्रहणमेव कृतं न उपमानग्रहणमिति, तद्वदत्र उभयग्रहणं न कर्त्तव्यम् । सत्यम् । तत्कृतं लोकप्रसिद्धिपरिग्रहार्थम् । यदेव उपमेयमुपमानं च लोकप्रसिद्धं तदेव परिगृह्यते, नेतरत् । नहि यथा—'मुखं कमलमिव' इति, तथा 'कुमुदमिव' इत्यपि भवति ।

गुणबाहुल्यतश्च कल्पिता ॥ २ ॥

गुणानां बाहुल्यं गुणबाहुल्यं तत उपमानोपमेयस्य साम्यात्कल्पितोपमा । कविभिः कल्पितत्वात् कल्पिता । पूर्वा तु लौकिकी । ननु कल्पितायां लोकप्रसिद्ध्यभावात् कथमुपमानोपमेयनियमः । गुणबाहुल्यस्य उत्कर्षापकर्षकल्पनाभ्याम् । तद्यथा—

> 'उद्गर्भहूणतरुणीरमणोपमर्दभुग्नोन्नतिस्तननिवेशनिभं हिमांशोः ।
> बिम्बं कठोरबिसकाण्डकडारगौरैर्विष्णोः पदं प्रथमभग्रकरैर्व्यनक्ति ॥'

'सद्योमुण्डितमत्तहूणचिबुकप्रस्पर्धि नारङ्गकम् ।'

'अभिनवकुशसूचिस्पर्धि कर्णे शिरीषम्' इति ।

'इदानीं प्लक्षाणां जरठदलविश्लेषचतुरः

शिखानामाबन्धः स्फुरति शुकचञ्चूपुटनिभः ।

ततः स्त्रीणां हन्त क्षममधरकान्तिं तुलयितुं

समन्तान्निर्याति स्फुटसुभगरागं किसलयम् ॥'

तद्द्वैविध्यम्, पदवाक्यार्थवृत्तिभेदात् ॥ ३ ॥

तस्या उपमाया द्वैविध्यम्, पदवाक्यार्थवृत्तिभेदात् । एका पदार्थवृत्तिः, अन्या वाक्यार्थवृत्तिरिति । पदार्थवृत्तिर्यथा—

'हरति तनुषु बभुलग्विमुक्तासु यासां

कनककणसधर्मा मान्मथो रोमभेदः ।'

वाक्यार्थवृत्तिर्यथा—

'पाण्ड्योऽयमंसार्पितलम्बहारः क्लृप्ताङ्गरागो हरिचन्दनेन ।

आभाति बालातपरक्तसानुः सनिर्झरोद्गार इवाद्रिराजः ॥'

सा पूर्णा लुप्ता च ॥ ४ ॥

सा उपमा पूर्णा लुप्ता च भवति ।

गुणद्योतकोपमानोपमेयशब्दानां सामग्र्ये पूर्णा ॥ ५

गुणादिशब्दानां सामग्र्ये साकल्ये पूर्णा । यथा—

'कमलमिव मुखं मनोज्ञमेतत्' इति ।

लोपे लुप्ता ॥ ६ ॥

गुणादिशब्दानां वैकल्ये लोपे लुप्ता । गुणशब्दलोपे यथा—'शशीव राजा' इति । द्योतकशब्दलोपे यथा—'दूर्वाश्यामेयम्' । उभयलोपे यथा—'शशिमुखो' इति । उपमानोपमेयलोपस्तु उपमाप्रपञ्चे द्रष्टव्यः ।

स्तुतिनिन्दातत्त्वाख्यानेषु ॥ ७ ॥

स्तुतौ निन्दायां तत्त्वाख्याने चास्याः प्रयोगः। स्तुतिनिन्द्योर्यथा—

'स्निग्धं भवत्यमृतकल्पमहो कलत्रं हालाहलं विषमिवापगुणं तदेव।'

तत्त्वाख्याने यथा—

'तां रोहिणीं विजानीहि ज्योतिषामत्र मण्डले।
यस्तन्वि तारकान्यासः शकटाकारमाश्रितः॥'

हीनत्वाधिकत्वलिङ्गवचनभेदासादृश्यासम्भवास्तद्दोषाः ॥ ८ ॥

तस्या उपमाया दोषा भवन्ति—

हीनत्वमधिकत्वं लिङ्गभेदो वचनभेदोऽसादृश्यमसम्भव इति।

तान् क्रमेण व्याख्यातुमाह—

जातिप्रमाणधर्मन्यूनतोपमानस्य हीनत्वम् ॥९॥

जात्या प्रमाणेन धर्मेण च उपमानस्य न्यूनता या तत् हीनत्वमिति।

जातिन्यूनत्वरूपं हीनत्वं यथा—

'चाण्डालैरिव युष्माभिः साहसं परमं कृतम्।'

प्रमाणन्यूनत्वरूपं हीनत्वं यथा—

'वह्निस्फुलिङ्ग इव भानुरयं चकास्ति।'

उपमेयात् उपमानस्य धर्मतो न्यूनत्वं यत्तत् धर्मन्यूनत्वम्। तद्रूपं हीनत्वं यथा—

'स मुनिर्लाञ्छितो मौञ्ज्या कृष्णाजिनपटं वहन्।
व्यराजन्नीलजीमूतभागाश्लिष्ट इवांशुमान्॥'

अत्र मौञ्जीप्रतिवस्तु तड़िन्नास्ति उपमान इति हीनत्वम्। न च कृष्णाजिनपटमात्रस्य उपमेयत्वं युक्तम्। मौञ्ज्या व्यर्थत्वप्रसङ्गात्। ननु नीलजीमूतग्रहणेन एव तड़िप्रतिपाद्यते। तन्न। व्यभिचारात्। अव्यभिचारे तु भवन्ती प्रतिपत्तिः केन वार्य्यते। तदाह—

धर्मयोरेकनिर्देशेऽन्यस्य संवित्, साहचर्य्यात्॥१०

धर्मयोरेकस्यापि धर्मस्य निर्देशेऽन्यधर्मस्य संवित् प्रतिपत्तिर्भवति। कुतः, साहचर्य्यात्। सहचरितत्वेन प्रसिद्धयोरवश्यम् एकस्य निर्देशेऽन्यस्य प्रतिपत्तिर्भवति। तद्यथा—

'निर्द्दष्टेऽपि बहिर्घने न विरमन्त्यन्तर्जरद्वेश्मनी
लूतातन्तुततिच्छिदो मधुपृषत्पिङ्गाः पयोबिन्दवः।
चूड़ावर्वरके निपत्य कणिकाभावेन जाताः शिशो-
रङ्गास्फालनभग्ननिद्रगृहिणीचित्तव्यथादायिनः॥'

अत्र मधुपृषतां वृत्तत्वपिङ्गत्वे सहचरिते। तत्र पिङ्गशब्देन पिङ्गत्वे प्रतिपन्ने वृत्तत्वप्रतिपत्तिर्भवति। एतेन—

'कनकफलकचतुरस्रं' श्रोणिबिम्बम्, इति व्याख्यातम्।

कनकफलकस्य गौरत्वचतुरस्रत्वयोः साहचर्य्यात् चतुरस्रत्वश्रुत्यैव गौरत्वप्रतिपत्तिरिति। ननु च यदि धर्मन्यूनत्वम् उपमानस्य दोषः, कथमयं प्रयोगः—

'सूर्य्यांशुसम्मीलितलोचनेषु दीनेषु पद्मानिलनिर्मलेषु।
साध्व्यः स्वगेहेष्विव भर्त्तृहीनाः केका विनेशुः शिखिनां मुखेषु॥'

अत्र बहुत्वमुपमेयधर्माणाम् उपमानात्। न विशिष्टानामेव मुखानाम् उपमेयत्वात्। तादृशेषु एव केकाविनाशस्य सम्भवात्।

तेनाधिकत्वं व्याख्यातम् ॥ ११ ॥

तेन हीनत्वेन अधिकत्वं व्याख्यातम्, जातिप्रमाणधर्माधिक्यम् अधिकत्वमिति। जात्याधिक्यरूपमधिकत्वं यथा—

'विघ्नन्तु हरयः शीघ्रं रुद्रा इव महौजसः।'

प्रमाणाधिक्यरूपं यथा—

'पातालमिव नाभिस्ते स्तनौ क्षितिधरोपमौ।
वेणीदण्डः पुनरयं कालिन्दीपातसन्निभः॥'

धर्माधिक्यरूपं यथा—

'सरश्मि चञ्चलं चक्रं दधद्देवो व्यराजत।
सवाडवाग्निः सावर्त्तः स्रोतसामिव नायकः॥'

सवाड़वाग्निरित्यस्य उपमेयेऽभावात् धर्माधिक्यमिति। अनयोः दोषयोः विपर्ययाख्यस्य दोषस्य अन्तर्भावान्न पृथक् उपादानम्। अत एव अस्माकं मते षड्दोषा इति।

उपमानोपमेययोर्लिङ्गव्यत्यासो लिङ्गभेदः ॥१२॥

उपमानस्य उपमेयस्य च लिङ्गयोर्व्यत्यासो विपर्ययो लिङ्गभेदः। यथा—

'सैन्यानि नद्य इव जग्मुरनर्गलानि।'

इष्टः पुंनपुंसकयोः प्रायेण ॥ १३ ॥

पुंनपुंसकयोरुपमानोपमेययोर्लिङ्गभेदः प्रायेण बाहुल्येन इष्टः। यथा—

'चन्द्रम् इव मुखं पश्यति' इति। 'इन्दुरिव मुखं भाति' इत्येवंप्रायं तु नेच्छन्ति।

लौकिक्यां समासाभिहितायामुपमाप्रपञ्चे च ॥१४

लौकिक्यामुपमायां समासाभिहितायाम् उपमायाम्

उपमाप्रपञ्चे च दृष्टो लिङ्गभेदः प्रायेणेति । लौकिक्यां यथा— 'छायेव स तस्य' 'पुरुष इव स्त्री' इति । समासाभिहितायां

यथा—'भुजलता नीलोत्पलसदृशी' इति ।

उपमाप्रपञ्चे यथा—

'शुद्धान्तदुर्लभमिदं वपुराश्रमवासिनो यदि जनस्य ।
दूरीकृताः खलु गुणैरुद्यानलता वनलताभिः ॥'

एवम् अन्यदपि प्रयोगजातं द्रष्टव्यम् ।

तेन वचनभेदो व्याख्यातः ॥ १५ ॥

तेन लिङ्गभेदेन वचनभेदो व्याख्यातः । यथा—

'पश्यामि लोचने तस्याः पुष्पं पुष्पलिहो यथा ।'

अप्रतीतगुणसादृश्यमसादृश्यम् ॥ १६ ॥

अप्रतीतैरेव गुणैः यत्सादृश्यं तत् अप्रतीतगुणसादृश्यम् असादृश्यम् । यथा—

'ग्रथ्नामि काव्यशशिनं विततार्थरश्मिम्' ।

काव्यस्य शशिना सह यत्सादृश्यं तत् अप्रतीतैरेव गुणैरिति । ननु च अर्थानां रश्मितुल्यत्वे सति काव्यस्य शशितुल्यत्वं भविष्यति । मैवम् । काव्यस्य शशितुल्यत्वे सिद्धे अर्थानां रश्मितुल्यत्वं सिद्ध्यति । न हि अर्थानां रश्मीनां च कश्चित् सादृश्यहेतुः प्रतीतो गुणोऽस्ति । तत् एवम् इतरेतराश्रयदोषो दुरुत्तर इति ।

असादृश्यहता ह्युपमा, तन्निष्ठाश्च कवयः ॥ १७ ॥

असादृश्येन हता असादृश्यहता उपमा, तन्निष्ठा उपमाननिष्ठाश्च कवय इति ।

का—५

उपमानाधिक्यात्तदपोह इत्येके ॥ १८ ॥

उपमानाधिक्यात्तस्य असादृश्यस्यापोह इत्येके मन्यन्ते ।

यथा—'कर्पूरहारहरहाससितं यशस्ते' ।

कर्पूरादिभिरुपमानैः बहुभिः यशसः सादृश्यं संस्थापितं भवति । तेषां शुक्लगुणातिरेकात् ।

नापुष्टार्थत्वात् ॥ १९ ॥

उपमानाधिक्यात्तदपोह इति यदुक्तं तन्न । अपुष्टार्थत्वात् । एकस्मिन् उपमाने प्रयुक्ते उपमानान्तरप्रयोगो न कश्चिदर्थविशेषं पुष्णाति । तेन 'बलसिन्धुः सिन्धुरिव क्षुभितः' इति प्रयुक्तम् । ननु सिन्धुशब्दस्य द्विः प्रयोगात् पौनरुक्त्यम् । न । अर्थविशेषात् । बलं सिन्धुरिव वैपुल्याद्बलसिन्धुः सिन्धुरिव क्षुभित इति क्षोभसारूप्यम् । तस्मात् अर्थभेदान्न पौनरुक्त्यम् । अर्थपुष्टिस्तु नास्ति । सिन्धुरिव क्षुभित इत्यनेन एव वैपुल्यं प्रतिपत्स्यते । उक्तं हि—

'धर्मयोरेकनिर्देशेऽन्यस्य संवित् । साहचर्यात् ।'

अनुपपत्तिरसम्भवः ॥ २० ॥

अनुपपत्तिः अनुपपन्नत्वम् उपमानस्य असम्भवः । यथा—

वदनस्यान्तः - विकासिनः

'चकास्ति वदने तस्याः स्मितच्छाया विकासिनि ।
उन्निद्रस्यारविन्दस्य मध्ये मुग्धेव चन्द्रिका ॥'

चन्द्रिकायाम् उन्निद्रत्वम् अरविन्दस्य इति अनुपपत्तिः । ननु अर्थविरोधोऽयम् अस्तु किम् उपमादोषकल्पनया । न । उपमायाम् अतिशयस्य इष्टार्थत्वात् । कथं तर्हि दोषः ?

न विरुद्धोऽतिशयः ॥ २१ ॥

विरुद्धस्य अतिशयस्य संग्रहो न कर्त्तव्य इत्यस्य सूत्रस्य तात्पर्य्यार्थः। तान् एतान् षट् उपमादोषान् ज्ञात्वा कविः परित्यजेत्।

इति काव्यालङ्कारसूत्रवृत्तावालङ्कारिके चतुर्थेऽधिकरणे द्वितीयोऽध्यायः।

उपमाधिकारः।

तृतीयोऽध्यायः।

सम्प्रति उपमाप्रपञ्चो विचार्य्यते—कः पुनरसौ इत्याह—

प्रतिवस्तुप्रभृतिरुपमाप्रपञ्चः ॥ १ ॥

प्रतिवस्तु प्रभृतिर्यस्य स प्रतिवस्तुप्रभृतिः। उपमायाः प्रपञ्च उपमाप्रपञ्च इति।

वाक्यार्थोपमायाः प्रतिवस्तुनो भेदं दर्शयितुमाह—

उपमेयस्योक्तौ समानवस्तुन्यासः प्रतिवस्तु ॥ २ ॥

समानं वस्तु वाक्यार्थः। तस्य न्यासः समानवस्तुन्यासः। उपमेयस्य अर्थाद्वाक्यार्थस्य उक्तौ सत्यामिति। अत्र द्वौ वाक्यार्थौ एको वाक्यार्थः प्रतिवस्तूपमाया इति भेदः। तद्यथा—

'देवीभावं गमिता परिवारपदं कथं भजत्येषा।
न खलु परिभोगयोग्यं दैवतरूपाङ्कितं रत्नम्॥'

प्रतिवस्तुनः समासोक्तेर्भेदं दर्शयितुमाह—

अनुक्तौ समासोक्तिः ॥ ३ ॥

उपमेयस्यानुक्तौ समानवस्तुन्यासः समासोक्तिः । संक्षेपवचनात् समासोक्तिरिति आख्या । यथा—

'श्लाघ्या ध्वस्ताध्वगग्लानेः करीरस्य मरौ स्थितिः ।
धिङ्मेरौ कल्पवृक्षाणामनुत्पन्नार्थिनां श्रियः ॥'

समासोक्तेरप्रस्तुतप्रशंसाया भेदं दर्शयितुमाह—

किञ्चिदुक्तावप्रस्तुतप्रशंसा ॥ ४ ॥

उपमेयस्य किञ्चित् लिङ्गमात्रेण उक्तौ समानवस्तुन्यासेऽप्रस्तुतप्रशंसा । यथा—

'लावण्यसिन्धुरपरैव हि काचनेयं यत्रोत्पलानि शशिना सह संप्लवन्ते ।
उन्मज्जति द्विरदकुम्भतटी च यत्र यत्रापरे कदलिकाण्डमृणालदण्डाः ॥'

अप्रस्तुतस्य अर्थस्य प्रशंसनम् अप्रस्तुतप्रशंसा ।

अपह्नुतिरपि ततो भिन्नेति दर्शयितुमाह—

समेन वस्तुनान्यापलापोऽपह्नुतिः ॥ ५ ॥

समेन तुल्येन वस्तुना वाक्यार्थेन अन्यस्य वाक्यार्थस्य अपलापो निह्नवो यः तस्य अध्यारोपेण असौ अपह्नुतिः । यथा—

'न केतकीनां विलसन्ति सूचयः प्रवासिनो हन्त हसत्ययं विधिः ।
तडिल्लतेयं न चकास्ति चञ्चला पुरः स्मरज्योतिरिदं प्रवर्त्तते ॥'

वाक्यार्थयोः तात्पर्य्यात् ताद्रूप्यमिति न रूपकम् ।

रूपकं तु कीदृशम् इत्याह—

उपमानोपमेयस्य गुणसाम्यात्तत्त्वारोपो रूपकम् ॥६

उपमानोपमेयस्य गुणसाम्यात् तत्त्वस्य अभेदस्य आरोपणम् आरोपः रूपकम् । उपमानोपमेययोः उभयोरपि ग्रहणं

लौकिक्याः कल्पितायाश्च उपमायाः प्रकृतित्वम् अत्र यथा विज्ञाय इत इति । यथा—

'इयं गेहे लक्ष्मीरियममृतवर्त्तिर्नयनयो-
रसावस्याः स्पर्शो वपुषि बहलश्चन्दनरसः ।
अयं कण्ठे बाहुः शिशिरमसृणो मौक्तिकसरः
किमस्या न प्रेयो यदि परमसह्यस्तु विरहः ॥'

मुखचन्द्रादीनां तु उपमा । समासात् न चन्द्रादीनां रूपकत्वं युक्तमिति । रूपकात् श्लेषस्य भेदं दर्शयितुमाह—

स धर्मेषु तन्त्रप्रयोगे श्लेषः ॥ ७ ॥

उपमानेन उपमेयस्य धर्मेषु गुणक्रियाशब्दरूपेषु सतत्त्वारोपः, तन्त्रप्रयोगे तन्त्रेण उच्चारणे सति श्लेषः । यथा—

आक्रष्टामलमण्डलाग्ररुचयः सन्नद्धवक्षःस्थलाः
सोष्माणो व्रणिता विपक्षहृदयप्रोन्माथिनः कर्कशाः ।
उद्वृत्ता गुरवश्च यस्य शमिनः श्यामायमानानना
योधा वारवधूस्तनाश्च ददुः क्षोभं स वोऽव्याज्जिनः ॥'

यथा च गौणस्यार्थस्य अलङ्कारत्वं तथा लाक्षणिकस्यापि इति दर्शयितुमाह—

सादृश्याल्लक्षणा वक्रोक्तिः ॥ ८ ॥

बहूनि हि निबन्धनानि लक्षणायाम् । तत्र सादृश्यात् लक्षणा वक्रोक्तिरसौ इति । यथा—

'उन्मिमील कमलं सरसीनां कैरवं च निमिमील मुहूर्त्तात् ।'

अत्र नेत्रधर्मौ उन्मीलननिमीलने सादृश्यात् विकाससङ्कोचौ लक्षयतः ।

'इह च निरन्तरनवमुकुलपुलकिता हरति माधवी हृदयम्।
मदयति च केसराणां परिणतमधुगन्धि निःश्वसितम् ॥'

अत्र निःश्वसितमिति परिमलनिर्गमं लक्षयति।

'संस्थानेन स्फुरतु सुभगः स्वर्चिषा चुम्बितुं द्याम्।'
'आलस्यमालिङ्गति गात्रमस्याः।'
'परिम्लानच्छायामनुवदति दृष्टिः कमलिनीम्।'
'प्रत्यूषेषु स्फुटितकमलामोदमैत्रीकषायः।'
'ऊरुद्वन्द्वं तरुणकदलीकाण्डसब्रह्मचारि।'

इत्येवम् आदिषु लक्षणार्थो निरूप्यत इति। लक्षणायां झटिति अर्थप्रतिपत्तिक्षमत्वं रहस्यम् आचक्षत इति। असादृश्यनिबन्धना तु लक्षणा न वक्रोक्तिः। यथा—

'जरठकमलकन्दच्छेदगौरैर्मयूखैः।'

अत्र च्छेदः सामीप्यात् द्रव्यं लक्षयति। तस्यैव गौरत्वोपपत्तेः।

रूपकवक्रोक्तिभ्याम् उत्प्रेक्षाया भेदं दर्शयितुमाह—

अतद्रूपस्यान्यथाध्यवसानमतिशयार्थमुत्प्रेक्षा ॥९॥

अतद्रूपस्य अतत्स्वभावस्य। अन्यथा अतत्स्वभावतया। अध्यवसानम् अध्यवसायः। न पुनः अध्यारोपो लक्षणा वा। अतिशयार्थमिति भ्रान्तिज्ञाननिवृत्त्यर्थम्। सादृश्यादियमुत्प्रेक्षेति। एनां च इवादिशब्दा द्योतयन्ति। यथा—

'स वः पायादिन्दुर्नवबिसलताकोटिकुटिलः
स्मरारेर्यो मूर्ध्नि ज्वलनकपिशे भाति निहितः।
स्रवन्मन्दाकिन्याः प्रतिदिवससिक्तेन पयसा
कपालेनोन्मुक्तः स्फटिकधवलेनाङ्कुर इव ॥'

उत्प्रेक्षैव अतिशयोक्तिरिति केचित् । तन्निरासार्थमाह—

सम्भाव्यधर्मस्य तदुत्कर्षकल्पनातिशयोक्तिः ॥१०॥

सम्भाव्यस्य धर्मस्य तदुत्कर्षस्य च कल्पना अतिशयोक्तिः ।

यथा—'उभौ यदि व्योम्नि पृथक् प्रवाहावाकाशगङ्गापयसः पतेताम् ।
तदोपमीयेत तमालनीलमामुक्तमुक्तालतमस्य वक्षः ॥'

यथा वा—'मलयजरसविलिप्ततनवो नवहारलताविभूषिताः
सिततरदन्तपत्रकृतवक्त्ररुचो रुचिरामलांशुकाः ।
शशभृति विततधाम्नि धवलयति धरामविभाव्यतां गताः
प्रियवसतिं प्रयान्ति सुखमेव निरस्तभियोऽभिसारिकाः ॥'

यथा भ्रान्तिज्ञानस्वरूपोत्प्रेक्षा तथा संशयज्ञानस्वरूपः सन्देहोऽपीति दर्शयितुमाह—

उपमानोपमेयसंशयः सन्देहः ॥ ११ ॥

उपमानोपमेययोरतिशयार्थं यः क्रियते संशयः स सन्देहः ।

यथा—'इदं कर्णोत्पलं चक्षुरिदं वेति विलासिनि ! ।
न निश्चिनोति हृदयं किन्तु दोलायते पुनः ॥'

सन्देहवत् विरोधोऽपि प्राप्तावसर इत्याह—

विरुद्धाभासत्वं विरोधः ॥ १२ ॥

अर्थस्य विरुद्धस्येव आभासत्वं विरुद्धाभासत्वं विरोधः ।

यथा—'पीतं पानमिदं त्वयाद्य दयिते मत्तं ममेदं मनः
पत्त्राली तव कुङ्कुमेन रचिता रक्ता वयं मानिनि ! ।
त्वं तुङ्गस्तनभारमन्थरगतिर्गात्रेषु मे वेपथु-
स्त्वन्मध्ये तनुता ममाधृतिरहो मारस्य चित्रा गतिः ॥'

यथा वा—'सा बाला वयमप्रगल्भमनसः सा स्त्री वयं कातराः
सा पीनोन्नतिमत्पयोधरयुगं धत्ते सखेदा वयम् ।

सा क्रान्ता जघनस्थलेन गुरुणा गन्तुं न शक्ता वयं
दोषैरन्यजनाश्रितैरपटवो जाताः स्म इत्यद्भुतम् ॥'

विरोधाद्विभावनाया भेदं दर्शयितुमाह—

क्रियाप्रतिषेधे प्रसिद्धतत्फलव्यक्तिर्विभावना ॥ १३ ॥

क्रियायाः प्रतिषेधे तस्या एव क्रियायाः फलस्य प्रसिद्धस्य व्यक्तिर्विभावना । यथा—

'अप्यसज्जनसाङ्गत्ये न वसत्येव वैकृतम् ।
अक्षालितविशुद्धेषु हृदयेषु मनीषिणाम् ॥'

विरोधप्रसङ्गेन अनन्वयं दर्शयितुमाह—

एकस्योपमेयत्वोपमानत्वेऽनन्वयः ॥ १४ ॥

एकस्यैव अर्थस्योपमेयत्वम् उपमानत्वं च अनन्वयः ।

यथा—'गगनं गगनाकारं सागरः सागरोपमः ।
रामरावणयोर्युद्धं रामरावणयोरिव ॥'

अनन्यसादृश्यम् एतेन प्रतिपादितम् ।

क्रमेणोपमेयोपमा ॥ १५ ॥

एकस्यैव अर्थस्योपमेयत्वम् उपमानत्वं च क्रमेण उपमेयोपमा । यथा—

'खमिव जलं जलमिव खं हंस इव शशी शशीव हंसोऽयम् ।
कुमुदाकारास्तारास्ताराकाराणि कुमुदानि ॥'

इयमेव परिवृत्तिरित्येके । तन्निरासार्थमाह—

समविसदृशाभ्यां परिवर्त्तनं परिवृत्तिः ॥ १६ ॥

समेन विसदृशेन वा अर्थेन अर्थस्य परिवर्त्तनं परिवृत्तिः

यथा—'आदाय कर्णकिसलयमियमस्मै चरणमरुणमर्पयति ।
उभयोः सदृशविनिमयादन्योन्यमवञ्चितं मन्ये ॥'

यथा वा—'विहाय सा हारमहार्घ्यनिश्चया विलोलदृष्टिः प्रविलुप्तचन्दना ।
बबन्ध बालारुणबभ्रु वल्कलं पयोधरोत्सेधविशीर्णसंहति ॥'

उपमेयोपमायाः क्रमो भिन्नः इति दर्शयितुमाह—

उपमेयोपमानानां क्रमसम्बन्धः क्रमः ॥ १७ ॥

उपमेयानाम् उपमानानां च उद्देशिनाम् अनुद्देशिनां च क्रमेण सम्बन्धः क्रमः । यथा—

'तस्याः प्रवृद्धलीलाभिरालापस्मितदृष्टिभिः ।
जीयन्ते वल्लकीकुन्दकुसुमेन्दीवरस्रजः ॥'

सम्बन्धप्रसङ्गेन एव दीपकं दर्शयितुमाह—

उपमानोपमेयवाक्येष्वेका क्रिया दीपकम् ॥१८॥

उपमानवाक्येषु उपमेयवाक्येषु चैका क्रिया अनुसङ्गतः सम्बध्यमाना दीपकम् ।

तत्त्रिविधम्, आदिमध्यान्तवाक्यवृत्तिभेदात् ॥१९॥

तत् त्रिविधं भवति । आदिमध्यान्तेषु वाक्येषु वृत्ते-भेदात् । यथा—

'भूष्यन्ते प्रमदवनानि बालपुष्पैः कामिन्यो मधुमदमांसलैर्विलासैः ।
ब्रह्माणः श्रुतिगदितैः क्रियाकलापै राजानो विरलितवैरिभिः प्रतापैः ॥'

'बाष्पः पथिककान्तानां जलं जलमुचां मुहुः ।
विगलत्यधुना दण्डयात्रोद्योगो महीभुजाम् ॥'

'गुरुशुश्रूषया बुद्धिर्मधुगोष्ठ्या मनोभवः ।
उदयेन शशाङ्कस्य पयोराशिर्विवर्द्धते ॥'

दीपकवत् निदर्शनमपि संक्षिप्तमित्याह—

क्रिययैव स्वतदर्थान्वयख्यापनं निदर्शनम् ॥ २० ॥

क्रिययैव शुद्धया स्वस्य आत्मनः तदर्थस्य च अन्वयस्य सम्बन्धस्य ख्यापनं संवलितहेतुदृष्टान्तविभागं निदर्शनम्।

यथा—'अत्युच्चपदाध्यासः पतनायेत्यर्थशालिनां शंसत्।
अपाण्डु पतति पत्रं तरोरिदं बन्धनग्रन्थेः॥'

पततीति क्रिया। तस्याः स्वं पतनम्। तदर्थोऽत्युच्चपदाध्यासः पतनायेति शंसनम्। तस्य ख्यापनम् अर्थशालिनां शंसदिति।

इदं च न अर्थान्तरन्यासः। स हि अन्यथाभूतः। तमाह—

उक्तसिद्धै वस्तुनोऽर्थान्तरस्यैव न्यसनमर्थान्तरन्यासः ॥ २१ ॥

उक्तसिद्धै उक्तस्य अर्थस्य सिद्ध्यर्थं वस्तुनो वाक्यार्थान्तरस्यैव न्यसनम् अर्थान्तरन्यासः। वस्तुग्रहणात् अर्थस्य हेतोर्न्यसनं न अर्थान्तरन्यासः। 'इह नातिदूरगोचरमस्ति सरः। कमलसौगन्ध्यात्' इति। अर्थान्तरस्यैव इति वचनम्, यत्र हेतुर्व्याप्तिगूढत्वात् कथञ्चित् प्रतीयते तत्र यथा स्यात्। 'यद्यत्कृतकं तत्तदनित्यम्' इत्येवंप्रायेषु मा भूदिति। उदाहरणम्।

'प्रियेण संग्रथ्य विपक्षसन्निधावुपाहितां वक्षसि पीवरस्तने।
स्रजं न काचिद्विजहौ जलाविलां वसन्ति हि प्रेम्णि गुणा न वस्तुनि॥'

अर्थान्तरन्यासस्य हेतुरूपत्वात् हेतोश्च अन्वयव्यतिरेकात्मकत्वात् न पृथक् व्यतिरेक इति केचित्। तत् निरासार्थम् आह—

उपमेयस्य गुणातिरेकत्वं व्यतिरेकः ॥ २२ ॥

उपमेयस्य गुणातिरेकत्वं गुणाधिक्यं यत् अर्थादुपमानात् स व्यतिरेकः। यथा—

'सत्यं हरिणशावाक्ष्याः प्रसन्नसुभगं मुखम्।
समानं शशिनः किं तु स कलङ्कविडम्बितः॥'

कश्चित् तु गम्यमानगुणो व्यतिरेकः। यथा—

'कुवलयवनं प्रत्याख्यातं नवं मधु निन्दितं
हसितममृतं भग्नं स्वादोः पदं रससम्पदः।
विषमुपहितं चिन्ताव्याजान्मनस्यपि कामिनां
चतुरमधुरैर्लीलातत्त्वैस्तवाक्षिविलोकितैः॥'

व्यतिरेकाद्विशेषोक्तेर्भेदं दर्शयितुमाह—

एकगुणहानिकल्पनायां साम्यदार्ढ्यं विशेषोक्तिः ॥ २३ ॥

एकस्य गुणस्य हानेः कल्पनायां शेषैः गुणैः साम्यं यत् तस्य दार्ढ्यं विशेषोक्तिः। रूपकं चेदं प्रायेण इति।

यथा—'भवन्ति यत्रौषधयो रजन्यामतैलपूराः सुरतप्रदीपाः।'
'द्यूतं हि नाम पुरुषस्यासिंहासनं राज्यम्।'
'निद्रेयमकमला लक्ष्मीः।' हस्ती हि जङ्गमं दुर्गम्।' इति।

अत्रापि जङ्गमशब्दस्य स्थावरत्वनिवृत्तिप्रतिपादनत्वात् एकगुणहानिकल्पना एव। एतेन—

'वेश्या हि नाम मूर्तिमत्येव निकृतिः।'
'व्यसनं हि नाम सोच्छ्वासं मरणम्।'
'द्विजो भूमिबृहस्पतिः।'

इत्येवमादिषु एकगुणहानिकल्पना व्याख्याता।

व्यतिरेकविशेषोक्तिभ्यां व्याजस्तुतिं भिन्नां दर्शयितुमाह—

सम्भाव्यविशिष्टकर्माकरणान्निन्दास्तोत्रार्था व्याजस्तुतिः ॥ २४ ॥

अत्यन्तगुणाधिको विशिष्टस्तस्य च कर्म विशिष्टकर्म तस्य सम्भाव्यस्य कर्त्तुं शक्यस्य अकरणान्निन्दा विशिष्टसाम्यसम्पादनेन स्तोत्रार्था व्याजस्तुतिः। यथा—

ववन्ध सिन्धुं गिरिचक्रवालैर्बिभेद सप्तैकशरेण तालान्।
एवंविधं कर्म ततान रामस्त्वया कृतं तन्न मुधैव गर्वः॥'

व्याजस्तुतेर्व्याजोक्तिं भिन्नां दर्शयितुमाह—

व्याजस्य सत्यसारूप्यं व्याजोक्तिः॥ २५ ॥

व्याजस्य छद्मनः सत्येन सारूप्यं व्याजोक्तिः। यां मायोक्तिमित्याहुः। यथा—

'शरच्चन्द्रांशुगौरेण वाताविद्धेन भामिनि।
काशपुष्पलवेनेदं साश्रुपातं मुखं कृतम्॥'

व्याजस्तुतेः पृथक् तुल्ययोगितेति आह—

विशिष्टेन साम्यार्थमेककालक्रियायोगस्तुल्ययोगिता ॥ २६ ॥

विशिष्टेन न्यूनस्य साम्यार्थम् एककालायां क्रियायां योगस्तुल्ययोगिता। यथा—

'जलनिधिरशनामिमां धरित्रीं वहति भुजङ्गविभुर्भवद्भुजश्च।'

उपमानाक्षेपश्चाक्षेपः॥ २७ ॥

उपमानस्य आक्षेपः प्रतिषेध उपमानाक्षेपः। तुल्यकार्य्यार्थस्य नैरर्थक्यविवक्षायाम्। यथा—

'तस्याश्चेन्मुखमस्ति सौम्यसुभगं किं पार्वणेनेन्दुना
सौन्दर्यस्य पदं दृशौ च यदि चेत् किं नाम नीलोत्पलैः ।
किं वा कोमलकान्तिभिः किसलयैः सत्येव तत्राधरे
हा धातुः पुनरुक्तवस्तुरचनारम्भेष्वपूर्वो ग्रहः ॥'

उपमानस्याक्षेपतः प्रतिपत्तिरित्यपि सूत्रार्थः । यथा—

'ऐन्द्रं धनुः पाण्डुपयोधरेण शरद्दधानार्द्रनखक्षताभम् ।
प्रसादयन्ती सकलङ्कमिन्दुं तापं रवेरभ्यधिकं चकार ॥'

अत्र शरद्वेश्येव, इन्दुं नायकमिव, रवेः प्रतिनायकस्येव इत्युपमानानि गम्यन्ते इति ।

तुल्ययोगितायाः सहोक्तेर्भेदमाह—

वस्तुद्वयक्रिययोस्तुल्यकालयोरेकपदाभिधानं सहोक्तिः ॥ २८ ॥

वस्तुद्वयस्य क्रिययोस्तुल्यकालयोः एकेन पदेन अभिधानं सहार्थशब्दसामर्थ्यात् सहोक्तिः । यथा—

'अस्तं भास्वान् प्रयातः सह रिपुभिरयं संह्रियन्तां बलानि ।'

अत्रार्थयोर्न्यूनत्वविशिष्टत्वेन स्त इति नेयं तुल्ययोगितेति ।

समाहितम् एकमवशिष्यते तल्लक्षणार्थमाह—

यत्सादृश्यं तत्सम्पत्तिः समाहितम् ॥ २९ ॥

यस्य वस्तुनः सादृश्यं गृह्यते तस्य वस्तुनः सम्पत्तिः समाहितम् । यथा—

'तन्वी मेघजलार्द्रपल्लवतया धौताधरेवाश्रुभिः
शून्येवाभरणैः स्वकालविरहाद्विश्रान्तपुष्पोद्गमा ।

चिन्तामोहमिवाश्रिता मधुलिहां शब्दैर्विना लक्ष्यते
चण्डी मामवधूय पादपतितं जातानुतापेव सा ॥'

अत्र पुरूरवसो लतायामुर्वश्याः सादृश्यं गृह्णतः सैव लतोर्वशी सम्पन्नेति ।

एते चालङ्काराः शुद्धा मिश्राश्च प्रयोक्तव्या इति विशिष्टानामलङ्काराणां मिश्रत्वं संसृष्टिरित्याह—

अलङ्कारस्यालङ्कारयोगित्वं संसृष्टिः ॥ ३० ॥

अलङ्कारस्यालङ्कारयोगित्वं यदसौ संसृष्टिरिति । संसृष्टिः संसर्गः सम्बन्ध इति ।

तद्भेदावुपमारूपकोत्प्रेक्षावयवौ ॥ ३१ ॥

तस्याः संसृष्टेर्भेदावुपमारूपकं चोत्प्रेक्षावयवश्चेति । उपमाजन्यं रूपकमुपमारूपकमिति । यथा—

'निरवधि च निराश्रयञ्च यस्य स्थितमनिवर्तितकौतुकप्रपञ्चम् ।
प्रथम इव भवान् स कूर्ममूर्तिर्जयति चतुर्दशलोकवल्लिकन्दः ॥'

एवं 'रजनिपुरन्ध्रिरोध्रतिलकः' इत्येवमादयस्तद्भेदा द्रष्टव्याः ।

उत्प्रेक्षाहेतुरुत्प्रेक्षावयवः ॥ ३२ ॥

उत्प्रेक्षाया हेतुरलङ्कार उत्प्रेक्षावयवः । अवयवशब्दो हि आरम्भकं लक्षयति । यथा—

'अङ्गुलीभिरिव केशसञ्चयं सन्निगृह्य तिमिरं मरीचिभिः ।
कुड्मलीकृतसरोजलोचनं चुम्बतीव रजनीमुखं शशी ॥'

एभिर्निदर्शनैः स्वीयैः परकीयैश्च पुष्कलैः ।
शब्दवैचित्र्यगर्भेयमुपमैव प्रपञ्चिता ॥

अलङ्कारैकदेशा ये मताः सौभाग्यभागिनः ।
तेऽप्यलङ्कारदेशीया योजनीयाः कवीश्वरैः ॥

इति काव्यालङ्कारसूत्रवृत्तावालङ्कारिके चतुर्थेऽधिकरणे तृतीयोऽध्यायः ।

इति उपमाप्रपञ्चाधिकारः ।

समाप्तं चेदमालङ्कारिकं चतुर्थमधिकरणम् ।

प्रायोगिकं नाम पञ्चममधिकरणम् ।

प्रथमोऽध्यायः ।

सम्प्रति काव्यसमयं शब्दशुद्धिं च दर्शयितुं प्रायोगिकाख्यमधिकरणमारभ्यते । तत्र काव्यसमयस्तावदुच्यते—

नैकं पदं द्विः प्रयोज्यं प्रायेण ॥ १ ॥

एकं पदं न द्विः प्रयोज्यं प्रायेण बाहुल्येन । यथा—

'पयीद पयीद' इति ।

किञ्चिदिवादिपदं द्विरपि प्रयोक्तव्यमिति । यथा—

'सन्तः सन्तः खलाः खलाः ।'

नित्यं संहितैकपदवत्पादेष्वर्द्धान्तवर्जम् ॥ २ ॥

नित्यं संहितापादेष्वेकपदवदेकस्मिन्निव पदे । तत्र हि नित्या संहितेत्याम्नायः । यथा—

'संहितैकपदे नित्या नित्या धातूपसर्गयोः' इति ।

अर्द्धान्तवर्जमर्द्धान्तं वर्जयित्वा ।

न पादान्तलघोर्गुरुत्वं च सर्वत्र ॥ ३ ॥

प्रादान्तलघोर्गुरुत्वं प्रयोक्तव्यं न सर्वत्र न सर्वस्मिन् वृत्ते इति। यथा—

'यासां बलिर्भवति मद्गृहदेहलीनां हंसैश्च सारसगणैश्च विलुप्तपूर्वः।
तास्वेव पूर्वबलिरूढयवाङ्कुरासु बीजाञ्जलिः पतति कीटमुखावलीढः॥'

एवम्प्रायेष्वेव वृत्तेष्विति। न पुनः।

'बहुधिनीनां रजसि प्रसर्पति समस्तमासीद्दिनिमीलितं जगत्।'

इत्यादिषु। चकारोऽर्द्धान्तवर्जमित्यस्यानुकर्षणार्थः।

न गद्ये समासप्रायं वृत्तमन्यवोद्गतादिभ्यः संवादात्॥ ४॥

गद्ये समासप्रायं वृत्तं न विधेयम्। शोभाभ्रंशात्। अन्यवोद्गतादिभ्यः विषमवृत्तेभ्यः। संवादात् गद्येनेति।

न पादादौ खल्वादयः॥ ५॥

पादादौ खल्वादयः शब्दा न प्रयोज्याः। आदिशब्दः प्रकारार्थः। येषामादौ प्रयोगो न श्लिष्यति ते गृह्यन्ते। न पुनर्वतहन्तप्रभृतयः।

नार्द्धे किञ्चिदसमाप्तप्रायं वाक्यम्॥ ६॥

वृत्तस्यार्द्धे किञ्चिदसमाप्तप्रायं वाक्यं न प्रयोक्तव्यम्।

यथा—'जयन्ति ताण्डवे शम्भोर्भङ्गुराङ्गुलिकोटयः।
कराः कृष्णस्य च भुजाश्चकांशुकपिशङ्गिताः॥'

न कर्मधारयो बहुव्रीहिप्रतिपत्तिकरः॥ ७॥

बहुव्रीहिप्रतिपत्तिं करोति यः कर्मधारयः स न प्रयोक्तव्यः। यथा—

'अध्यासितश्वासौ तरुश्चाध्यासितरुः' इति।

तेन विपर्य्ययो व्याख्यातः ॥ ८ ॥

बहुव्रीहिरपि कर्मधारयप्रतिपत्तिकरो न प्रयोक्तव्यः ।
यथा—'वीराः पुरुषा यस्य स वीरपुरुषः' । 'कलो रवो यस्य स कलरवः ।' इति ।

सम्भाव्यनिषेधनिवर्त्तने द्वौ प्रतिषेधौ ॥ ९ ॥

सम्भाव्यस्य निषेधस्य निवर्त्तने द्वौ प्रतिषेधौ प्रयोक्तव्यौ ।
यथा—'समरमूर्द्धनि येन तरस्विना न न जितो विजयी त्रिदशेश्वरः ।
स खलु तापसबाणपरम्पराकवलितक्षतजः क्षितिमाश्रितः ॥'

विशेषणमात्रप्रयोगो विशेष्यप्रतिपत्तौ ॥ १० ॥

विशेष्यस्य प्रतिपत्तौ जातायां विशेषणमात्रस्यैव प्रयोगः । यथा—

'निधानगर्भामिव सागराम्बराम् ।'

अत्र हि पृथिव्या विशेषणमात्रमेव प्रयुक्तम् । एतेन

'क्रुद्धस्य तस्याथ पुरासरातेर्ललाटपट्टादुदगादुदर्चिः ।'

'गिरेस्तडित्वानिव तावदुच्चकैर्जवेन पीठादुदतिष्ठदच्युतः ।'

इत्यादयः प्रयोगा व्याख्याताः ।

सर्वनाम्नानुसन्धिर्वृत्तिच्छन्नस्य ॥ ११ ॥

सर्वनाम्नानुसन्धिरनुसन्धानं प्रत्यवमर्शः । वृत्तिच्छन्नस्य वृत्तौ समासे छन्नस्य गुणीभूतस्य । यथा—

'तवापि नीलोत्पलपत्रचक्षुषो मुखस्य तद्रेणुसमानगन्धिनः' इति ।

सम्बन्धसम्बन्धेऽपि षष्ठी क्वचित् ॥ १२ ॥

सम्बन्धेन सम्बन्धः सम्बन्धसम्बन्धस्तस्मिन् षष्ठी प्रयोज्या क्वचित्, न सर्वत्रेति । यथा—

'कमलस्य कन्दः' इति ।

कमलेन सम्बद्धा कमलिनी नलिनी तस्याः कन्द इति सम्बन्धसम्बन्धः। तेन कदलीकाण्डादयो व्याख्याताः।

अतिप्रयुक्तं देशभाषापदम् ॥ १३ ॥

अतीव कविभिः प्रयुक्तं देशभाषापदं प्रयोज्यम्। यथा—

'योषिदित्यभिललाष न हालां'

इत्यत्र हालेति देशभाषापदम्। अनतिप्रयुक्तं तु न प्रयोज्यम्। यथा—

'कङ्केलीकाननालीरविरलविलसत्पल्लवा नर्त्तयन्तः।'

इत्यत्र कङ्केलीपदम्।

लिङ्गाध्याहारौ ॥ १४ ॥

लिङ्गं चाध्याहारश्च लिङ्गाध्याहारावतिप्रयुक्तौ प्रयोज्याविति। लिङ्गं यथा—

'वत्से मा वज्ञ निःश्वसीः कुरु मुरागण्डूषमेकं शनैः।'

इत्यादिषु गण्डूषशब्दः पुंसि भूयसा प्रयुक्तः, न स्त्रियामाम्नातोऽपि स्त्रीत्वे।

अध्याहारो यथा—

'मा भवन्तमनलः पवनो वा वारणो मदकलः परशुर्वा।
वाहिनीजलभरः कुलिशं वा स्वस्ति तेऽस्तु लतया सह वृक्ष॥'

अत्र ह्यधाक्षीदित्यादीनामध्याहारोऽन्वयप्रयुक्तः।

लक्षणाशब्दाश्च ॥ १५ ॥

लक्षणाशब्दाश्चातिप्रयुक्ताः प्रयोज्याः। यथा, द्विरेफरथचरणशब्दौ भ्रमरचक्रवाकार्थौ लक्षणापरौ। अनतिप्रयुक्ताश्च न प्रयोक्तव्याः। यथा—द्विकः काक इति।

न तद्बाहुल्यमेकत्र ॥ १६ ॥

तेषां लक्षणाशब्दानां बाहुल्यमेकस्मिन् वाक्ये न प्रयोक्तव्यम्। शक्यते ह्येकस्यावाचकस्य वाचकवद्भावः कर्त्तुम्, न बहूनामिति।

स्तनादीनां द्वित्वाविष्टा जातिः प्रायेण ॥ १७ ॥

स्तनादीनां द्वित्वाविष्टा द्वित्वाध्यासिता जातिः प्रायेण बाहुल्येनेति। यथा—

'स्तनयी स्तरुणीजनस्य—' इति।

प्रायेणेति वचनात् क्वचिन्न भवति। यथा—

'स्त्रीणां चक्षुः' इति।

अथ कथं द्वित्वाविष्टत्वं जातेः। तद्धि द्रव्ये, न जातौ। अतद्रूपत्वाज्जातेः। न दोषः तदतद्रूपत्वाज्जातेः। कथं तदतद्रूपत्वं जातेः। तद्धि जैमिनीया जानन्ति। वयं तु लक्ष्यसिद्धौ सिद्धपरमतानुवादिनः। न चैवमतिप्रसङ्गः। लक्ष्यानुसारित्वात् न्यायस्येति। एवमन्यत्रापि व्यवस्थोह्या।

इति काव्यालङ्कारसूत्रवृत्तौ प्रायोगिके पञ्चमेऽधिकरणे प्रथमोऽध्यायः।

काव्यसमयः।

द्वितीयोऽध्यायः।

साम्प्रतं शब्दशुद्धिरुच्यते—

रुद्रावित्येकशेषोऽन्वेष्यः ॥ १ ॥

रुद्रावित्यत्र प्रयोगे एकशेषोऽन्वेष्योऽन्वेषणीयः। रुद्रश्च

रुद्राणी चेति 'पुमान् स्त्रिया' इत्येकशेषः। स च न प्राप्नोति। तत्र हि तल्लक्षणश्चेदेव विशेषः इत्यनुवर्त्तते इति तत्रैवकारकरणात् स्त्रीपुंसकृत एव विशेषो भवतीति व्यवस्थितम्। अत्र तु 'पुंयोगादाख्यायाम्' इति विशेषान्तरमप्यस्तीति। एतेनेन्द्रौ भवौ शर्वौ इत्यादय प्रयोगाः प्रत्युक्ताः।

मिलिक्षविच्छपिप्रभृतीनां धातुत्वम्। धातुगणस्यासमाप्तेः॥ २॥

मिलतिविक्षवतिच्छयतीत्यादयः प्रयोगाः। तत्र मिलिक्षविच्छपिप्रभृतीनां कथं धातुत्वम्। गणपाठात् गणपठितानामेव धातुसंज्ञाविधानात्। तत्राह—धातुगणस्यासमाप्तेः। वर्द्धते धातुगुण इति हि शब्दविद आचक्षते। तेनैषां गणपाठोऽनुमतः शिष्टप्रयोगादिति।

वलेरात्मनेपदमनित्यं ज्ञापकात्॥ ३॥

वलेरनुदात्तेत्त्वादात्मनेपदं यत्तदनित्यं दृश्यते 'लज्जाशीलं वलन्तौ' इत्यादि प्रयोगेषु। तत्कथमित्याह—ज्ञापकात्।

किं पुनस्तज्ज्ञापकमत आह—

चक्षिङोऽनुबन्धकरणम्॥ ४॥

चक्षिङ इकारेणैवानुदात्तेन सिद्धमात्मनेपदं किमर्थं ङित्करणम्। तत्क्रियते अनुदात्तनिमित्तस्यात्मनेपदस्यानित्यत्वज्ञापनार्थम्। एतेन वेदिभर्त्सितर्जिप्रभृतयो व्या-

ख्याताः। आवेदयति-भर्त्सयति-तर्जयतीत्यादीनां प्रयोगाणां दर्शनात्। अन्यत्राप्यनुदात्तनिबन्धनस्यात्मनेपदस्यानित्यत्वं ज्ञापकेन द्रष्टव्यमिति।

चीयत इति कर्मकर्त्तरि ॥ ५ ॥

चीयत इति प्रयोगो दृश्यते स कर्मकर्त्तरि द्रष्टव्यः। चीयतेरनात्मनेपदित्वात्।

स्विद्यत इति च ॥ ६ ॥

स्विद्यत इति च प्रयोगो दृश्यते सोऽपि कर्मकर्त्तर्य्येव द्रष्टव्यः, न कर्त्तरि। अदेवादिकत्वात् स्विदेः।

मार्गेरात्मनेपदमलक्ष्म ॥ ७ ॥

चुरादौ 'मार्ग अन्वेषणे' इति पठ्यते 'आ धृषाद्वा' इति विकल्पितणिच्कः तस्माद्यदात्मनेपदं दृश्यते—'मार्गन्तां देहभारं—' इति तदलक्ष्म अलक्षणम्। परस्मैपदित्वान्मार्गेः। तथा च शिष्टप्रयोगः—'करकिसलयं धूत्वा धूत्वा विमार्गति वाससी।'

लोलमानादयश्चानशि ॥ ८ ॥

लोलमानो वेल्लमान इत्यादयश्चानशि द्रष्टव्याः। शानचस्त्वभावः। परस्मैपदित्वाद्धातूनामिति।

लभेर्गत्यर्थत्वाण्णिच्यणौ कर्तुः कर्मत्वाकर्मत्वे ॥९॥

अस्त्ययं लभिर्यः प्राप्त्युपसर्जनां गतिमाह, अस्ति च गत्युपसर्जनां प्राप्तिमाहेति। अत्र पूर्वस्मिन् पक्षे गत्यर्थ-

त्वाल्लभेर्णिच्यणौ यः कर्त्ता तस्य गत्यादिसूत्रेण कर्म्मसंज्ञा। यथा—

यथा—'दीर्घिकासु कुमुदानि विकासं लम्भयन्ति शिशिराः शशिभासः।'

द्वितीयपक्षे गत्यर्थाल्लभेर्णिच्यणौ कर्त्तुर्न कर्म्मसंज्ञा।

यथा—'सितं सितिम्ना सुतरां मुनेर्वपुर्विसारिभिः सौधमिवाथ लम्भयन्
द्विजावलिव्याजनिशाकरांशुभिः शुचिस्मितां वाचमवोचदच्युतः॥'

ते-मे शब्दौ निपातेषु॥ १०॥

त्वयामयेत्यस्मिन्नर्थे ते-मे-शब्दौ निपातेषु द्रष्टव्यौ। यथा—'श्रुतं ते वचनं तस्य', 'वेदानधीत इति नाधिगतं पुरा मे'।

तिरस्कृत इति परिभूतेऽन्तर्ध्युपचारात्॥ ११॥

तिरस्कृत इति शब्दः परिभूते दृश्यते। 'राज्ञा तिरस्कृतः' इति। स च न प्राप्नोति। तिरःशब्दस्य हि 'तिरोऽन्तर्धौ' इत्यन्तर्धौ गतिसंज्ञा। तस्यां च सत्यां 'तिरसोऽन्यतरस्याम्' इति सकारः। तत्कथं तिरस्कृत इति परिभूते। आह—अन्तर्ध्युपचारादिति। परिभूतो ह्यन्तर्हितवद्भवति। मुख्यस्तु प्रयोगो यथा—

लावण्यप्रसरतिरस्कृताङ्गलेखां' इति।

नैकशब्दः सुप्सुपेतिसमासात्॥ १२॥

'अरण्यानीस्थानं फलनमितनैकद्रुममिदम्।'

इत्यादिषु नैकशब्दो दृश्यते स च न सिध्यति। नञ्समासे 'नलोपो नञः' इति नलोपे 'तस्मान्नुड़चि' इति नुडागमे सत्यनेकमिति रूपं स्यात्। निरनुबन्धस्य नशब्दस्य समासलक्षणं नास्ति। तत्कथं नैकशब्द इत्याह—सुप्सुपेति समासात्।

मधुपिपासुप्रभृतीनां समासो गमिगाम्यादिषु पाठात् ॥ १३ ॥

'मधुपिपासुव्रतसेवितं मुकुलजालमजृम्भत वीरुधाम्।'

इत्यादिषु मधुपिपासुप्रभृतीनां समासो गमिगाम्यादिषु पिपासुप्रभृतीनां पाठात्। 'श्रितादिषु गमिगाम्यादीनाम्' इति द्वितीयासमासलक्षणं दर्शयति।

त्रिवलीशब्दः सिद्धः संज्ञा चेत् ॥ १४ ॥

त्रिवलीत्ययं शब्दः सिद्धो यदि संज्ञा। 'दिक्संख्ये संज्ञायाम्' इति संज्ञायामेव समासविधानात्।

बिम्बाधर इति वृत्तौ मध्यमपदलोपिन्याम् ॥ १५ ॥

'बिम्बाधरः पीयते' इति प्रयोगो दृश्यते। स च न युक्तः। अधरबिम्बम् इति भवितव्यम्। 'उपमितं व्याघ्रादिभिः—' इति समासे सति। तत्कथं बिम्बाधर इत्याह— वृत्तौ मध्यमपदलोपिन्यां शाकपार्थिवादित्वात्समासे। मध्यमपदलोपिनि समासे सति बिम्बाकारोऽधरो बिम्बाधर इति। तेन बिम्बौष्ठशब्दोऽपि व्याख्यातः। अत्रापि पूर्ववद्वृत्तिः। शिष्टप्रयोगेषु चैष विधिः। तेन नातिप्रसङ्गः।

आमूललोलादिषु वृत्तिर्विस्पष्टपटुवत् ॥ १६ ॥

आमूललोलमामूलसरलमित्यादिषु वृत्तिर्विस्पष्टपटुवत्। मयूरव्यंसकादित्वात्। लोलमिव लोलम् आमूलं तल्लोलं चेति।

न धान्यषष्ठादिषु षष्ठीसमासप्रतिषेधः। पूरणेनान्यतद्धितान्तत्वात् ॥ १७ ॥

धान्यषष्ठं 'तान्युञ्छषष्ठाङ्कितसैकतानि' इत्यादिषु न षष्ठीसमासप्रतिषेधः। पूरणेन पूरणप्रत्ययान्तेनान्यतद्धितान्तत्वात्। षष्ठो भागः षष्ठ इति। 'पूरणाद्भागे तीयादन्' 'षष्ठाष्टमाभ्यां ञ च' इत्यन् विधानात्स प्राप्तः।

पत्रपीतिमादिषु गुणवचनेन ॥ १८ ॥

पत्रपीतिमा पञ्चालीपिङ्गलिमा इत्यादिषु षष्ठीसमासप्रतिषेधो गुणवचनेन प्राप्तो बालिश्यात्तु न कृतः।

अवर्ज्यो बहुव्रीहिर्व्यधिकरणो जन्माद्युत्तरपदः ॥ १९ ॥

अवर्ज्यो न वर्जनीयो व्यधिकरणो बहुव्रीहिः। जन्माद्युत्तरं पदं यस्य स जन्माद्युत्तरपदः। यथा—

शास्त्रार्थजन्मा हि विवेकलाभः', 'कण्ठगतयः प्राणाः' इति।

हस्ताग्राग्रहस्तादयो गुणगुणिनोर्भेदाभेदात् ॥२०॥

हस्ताग्रमग्रहस्तः पुष्पाग्रमग्रपुष्पमित्यादयः प्रयोगाः कथम्। आहिताग्न्यादिष्वपाठात्। पाठे वा तदनियमः स्यात्। अत आह—गुणगुणिनोर्भेदाभेदात्। तत्र भेदात् हस्ताग्रादयः। अभेदादग्रहस्तादयः।

पूर्वनिपातेऽपभ्रंशो रक्ष्यः ॥ २१ ॥

काष्ठतृणं तृणकाष्ठमिति यदृच्छया पूर्वनिपातं कुर्वन्ति

तत्रापभ्रंशो रक्ष्यो रक्षणीयः। अनित्यत्वज्ञापनं तु न सर्वविषयमिति।

निपातेनाप्यभिहिते कर्मणि न कर्मविभक्तिः। परिगणनस्य प्रायिकत्वात्॥ २२॥

'अनभिहिते' इत्यत्र सूत्रे तिङ् कृत्तद्धितसमासैरिति परिगणनं कृतं, तस्य प्रायिकत्वान्निपातेनाप्यभिहिते कर्मणि न कर्मविभक्तिर्भवति। यथा—

'विषवृक्षोऽपि सम्वर्द्ध्य स्वयं छेत्तुमसाम्प्रतम्' इति। 'पण्डितं मूर्खं इति मन्यते'

शक्यमिति रूपं विलिङ्गवचनस्यापि कर्माभिधायां सामान्योपक्रमात्॥ २३॥

शकेः 'शकिसहोश्च' इति कर्मणि यति कृते शक्यमिति रूपं भवति। विलिङ्गवचनस्यापि विरुद्धलिङ्गवचनस्यापि कर्माभिधायां कर्मवचने सामान्योपक्रमात् विशेषानपेक्षायामिति। यथा—

'शक्यमौषधिपतेर्नवोदयाः कर्णपूररचनाकृते तव।
अप्रगल्भयवसूचिकोमलाश्छेत्तुमग्रनखसम्पुटैः कराः॥'

अत्र भाष्यकृद्वचनं लिङ्गम्। यथा—

'शक्यं च श्वमांसादिभिरपि क्षुत्प्रतिहन्तुम्' इति।

न चैकान्तिकः सामान्योपक्रमः। तेन—

'शक्या भङ्क्तुं झटिति विसिनीकन्दवच्चन्द्रपादाः'

इत्यपि भवति।

हानिवदाधिक्यमप्यङ्गानां विकारः॥ २४॥

'येनाङ्गविकारः' इत्यत्र सूत्रे यथाङ्गानां हानिस्तथा-

का—७

धिक्यमपि विकारः। यथा—'अक्ष्णा काणः' इति भवति तथा 'मुखेन त्रिलोचनः' इत्यपि भवति।

न कृमिकीटानामिति, एकवद्भावप्रसङ्गात् ॥२५॥

'आयुषः कृमिकीटानामलङ्करणमल्पता'

इत्यत्र कृमिकीटानामिति प्रयोगो न युक्तः। 'क्षुद्रजन्तवः' इत्येकवद्भावप्रसङ्गात्। न च मध्यमपदलोपी समासो युक्तः। तस्यासर्वविषयत्वात्।

न, खरोष्ट्रौ। उष्ट्रखरमिति पाठात् ॥ २६ ॥

'खरोष्ट्रौ वाहनं येषाम्' इत्यत्र खरोष्ट्राविति प्रयोगो न युक्तः। गवाश्वप्रभृतिषु उष्ट्रखरमिति पाठात्।

आसेत्यसतेः ॥ २७ ॥

'लावण्यमुत्पाद्य इवास यत्नः' इत्यत्र आसेत्यसतेर्धातोः 'अस गतिदीप्त्यादानेषु' इत्यस्य प्रयोगः, नास्तेः। भूभावविधानात्।

युध्येदिति युधः क्यचि ॥ २८ ॥

'यो भर्तृपिण्डस्य कृते न युध्येत्' इति प्रयोगः स चायुक्तः। युधेरात्मनेपदित्वात्। तत्कथं युध्येदित्याह—युधः क्यचि। युधमात्मन इच्छेद्युध्येदिति।

विरलायमानादिषु क्यङ् निरूप्यः ॥ २९ ॥

'विरलायमाने मलयमारुते' इत्यादिषु क्यङ् निरूप्यः। भृशादिषु पाठात्। नापि क्यष्। लोहितादिषु अपाठात्।

अहेतौ हन्तेर्णिच्, चुरादिपाठात् ॥ ३० ॥

'घातयित्वा दशास्यम्' इत्यत्र अहेतौ णिच् दृश्यते, स कथमित्याह—चुरादिपाठात्। चुरादिषु 'चट स्फुटभेदे' 'घट सङ्घाते' हन्त्यर्थाश्च" इति पाठात्।

अनुचरीति चरेष्टित्वात् ॥ ३१ ॥

'अनुचरी प्रियतमा मदालसा' इत्यत्रानुचरीति न युक्तः। ईकारलक्षणाभावात्। तत्कथम्। आह—चरेष्टित्वात्। पचादिषु चरट् इति पठ्यते।

केसरालमित्यलतेरणि ॥ ३२ ॥

केशरालं शिलीन्ध्रम्' इत्यत्र केसरालमिति कथम्। आह—अलतेरणि। 'अलं भूषणपर्य्याप्तिवारणेषु' इत्यस्मात् धातोः केसरशब्दे कर्मण्युपपदे 'कर्मण्यण्' इत्यनेन अणि सति केसरालमिति सिध्यति।

पत्त्रलमिति लातेः के ॥ ३३ ॥

'पत्त्रलं वनमिदं विराजते' इत्यत्र पत्त्रलमिति कथम्। आह—लातेः के। 'ला आदाने' इत्येतस्माद्धातोरादानार्थात् पत्त्रशब्दे कर्मण्युपपदे 'आतोऽनुपसर्गे कः' इति कप्रत्यये सतीति।

महीध्रादयो मूलविभुजादिदर्शनात् ॥ ३४॥

महीध्रधरणीध्रादयः शब्दा मूलविभुजादिदर्शनात्-के प्रत्यये सतीति। महीं धरतीति महीध्र इति। एवमादयोऽन्येऽपि द्रष्टव्याः।

ब्रह्मादिषु हन्तेर्नियमादरिहाद्यसिद्धिः ॥ ३५ ॥

ब्रह्मादिषु उपपदेषु हन्तेः क्विब् विधौ 'ब्रह्मभ्रूणवृत्रेषु—' इत्यत्र अरिहा रिपुहा इत्येवमादीनामसिद्धिः । नियमात् । 'ब्रह्मादिष्वेव, हन्तेरेव, क्विबेव, भूतकाल एवेति चतुर्विधश्चात्र नियमः' इति नियमान्यतरविषयो निरूप्यः ।

ब्रह्मविदादयः कृदन्तवृत्त्या ॥ ३६ ॥

ब्रह्मविद्वृत्रभिदित्यादयः प्रयोगा न युक्ताः । 'ब्रह्मभ्रूण—' इत्यादिषु 'हन्तेरेव' इति नियमात् । आह—कृदन्तवृत्त्या । वेत्तीति वित् । भिनत्तीति भित् । 'क्विप् च' इति क्विप् । ततः कृदन्तैर्विदादिभिः सह ब्रह्मादीनां षष्ठीसमास इति ।

तैर्महीधरादयो व्याख्याताः ॥ ३७ ॥

तैर्विदादिभिर्महीधरादयो व्याख्याताः । धरतीति धरः । मह्या धरो महीधरः । एवं गङ्गाधरादयो व्याख्याताः ।

भिदुरादयः कर्मकर्त्तरि कर्त्तरि च ॥ ३८ ॥

भिदुरं काष्ठम् । भिदुरं तमः । 'तिमिरभिदुरं व्योम्नः शृङ्गं—'इति । छिदुरातपो दिवसः । मत्सरच्छिदुरं प्रेम । भङ्गुरा प्रीतिः । 'मातङ्गं मानभङ्गुरम्' इत्यादयो हि प्रयोगा दृश्यन्ते । कथमित्याह—ते कर्मकर्त्तरि कर्त्तरि च भवन्ति । 'कर्मकर्त्तरि चायमिष्यते' इत्यत्र हि चकारः कर्त्तरि चेत्यस्य समुच्चयार्थः ।

गुणविस्तरादयश्चिन्त्याः ॥ ३९ ॥

गुणविस्तरः व्याक्षेपविस्तरः इत्यादयः प्रयोगाश्चिन्त्याः । 'प्रथने वावशब्दे' इति घञ् प्रसङ्गात् ।

अवतरावचायशब्दयोर्दीर्घह्रस्वत्वव्यत्यासो बालानाम् ॥ ४० ॥

अवतरशब्दस्यावचायशब्दस्य च दीर्घत्वह्रस्वत्वयोर्व्यत्यासो बालानां बालिशानां प्रयोगेष्विति । ते ह्यवतरणमवतार इति प्रयुञ्जते । मारुतावतार इति । स ह्ययुक्तः । भावे तरतेरविधानात् । अवचयनमवचय इति प्रयुञ्जते । पुष्पावचय इति । अत्र 'हस्तादाने चेरस्तेये' इति घञ् प्राप्त इति ।

शोभेति निपातनात् ॥ ४१ ॥

शोभेत्ययं शब्दः साधुः । निपातनात् । 'शुभशुम्भशोभार्थौ' इति शुभेर्भिदादेराकृतिगणत्वादङ् सिद्ध एव । गुणप्रतिषेधाभावस्तु निपात्यत इति । शोभार्थावित्यत्रैकदेशे किं शोभा, आहोस्विच्छोभ इति विशेषावगतिराचार्यपरम्परोपदेशादिति ।

अविधौ गुरोः स्त्रियां बहुलं विवक्षा ॥ ४२ ॥

अविधावविधाने 'गुरोश्च हलः' इति स्त्रियां बहुलं विवक्षा । क्वचिद्विवक्षा, क्वचिदविवक्षा, क्वचिदुभयमिति । विवक्षा यथा—ईहा लज्जेति । अविवक्षा यथा—आतङ्क इति । विवक्षाविवक्षे यथा—बाधा बाधः, ऊहा ऊहः, व्रीडा व्रीडः, इति ।

व्यवसितादिषु क्तः कर्त्तरि चकारात् ॥ ४३ ॥

व्यवसितः प्रतिपन्न इत्यादिषु भावकर्मविहितोऽपि क्तः कर्त्तरि। गत्यादिसूत्रे चकारस्यानुक्तसमुच्चयार्थत्वात्। भावकर्मानुकर्षणार्थत्वं चकारस्येति चेत्, आवृत्तिः कर्त्तव्या।

आहेति भूतेऽन्यलडन्तभ्रमाद् ब्रुवो लटि ॥४४॥

'ब्रुवः पञ्चानां—' इत्यादिना आहेति लट्युत्पादितः। स भूते प्रयुक्तः। 'इत्याह भगवान् प्रभुः' इति। अन्यस्य भूतकालाभिधायिनो लडन्तस्य लिटि भ्रमात्। निपुणाश्चैवं प्रयुञ्जते—'आह स्म स्मितमधुमधुराक्षरां गिरम्' इति। 'अनुकरोति भगवतो नारायणस्य' इत्यत्रापि मन्ये 'स्म'शब्दः कविना प्रयुक्तो लेखकैस्तु प्रमादान्न लिखित इति।

शबलादिभ्यः स्त्रियां टापोऽप्राप्तिः ॥ ४५ ॥

'उपस्रोत: स्वस्थस्थितमहिषशृङ्गाग्रशबलाः
स्रवन्तीनां जाताः प्रमुदितविहङ्गास्तटभुवः।'
'भ्रमरीत्करकल्माषाः कुसुमानां समृद्धयः।'

इत्यादिषु शबलादिभ्यः स्त्रियां टापोऽप्राप्तिः। 'अन्यतो ङीष्' इति ङीष्विधानात्। तेन शबली कल्माषीति भवति।

प्राणिनि नीलेति चिन्त्यम् ॥ ४६ ॥

'कुवलयदलनीला कोकिला बालचूते'

इत्यादिषु नीलेति चिन्त्यम्। कोकिला नीलीति भवितव्यम्। नीलशब्दात् 'जानपद—' इत्यादि सूत्रेण 'प्राणिनि च' इति ङीष्विधानात्।

मनुष्यजातेर्विवक्षाविवक्षे ॥ ४७ ॥

'इतो मनुष्यजातेः', 'ऊङुतः' इत्यत्र मनुष्यजातेर्विवक्षा अविवक्षा च लक्ष्यानुसारतः।

'मन्दरस्य मदिराक्षि पार्श्वतो निम्ननाभि न भवन्ति निम्नगाः।
वासु वासुकिविकर्षणोद्भवा भामिनीह पदवी विभाव्यते ॥'

अत्र मनुष्यजातेर्विवक्षायां 'इतो मनुष्यजातेः' इति ङीषि सति 'अम्बार्थनद्योर्ह्रस्वः' इति सम्बुद्धौ ह्रस्वत्वं सिध्यति। नाभिशब्दात्पुनः 'इतश्च प्राण्यङ्गात्' इतीकारे कृते निम्ननाभीकेति स्यात्।

"हतोष्ठरागैर्नयनोदबिन्दुभिर्निमग्ननाभेर्निपतद्भिरङ्कितम्।
च्युतं रुषा भिन्नगतेरसंशयं शुकोदरश्याममिदं स्तनांशुकम् ॥"

अत्र निमग्ननाभेरिति मनुष्यजातेरविवक्षेति ङीष् न कृतः। 'सुतनु जहिहि कोपं—' इत्यत्र मनुष्यजातेर्विवक्षेति सुतनुशब्दात् "ऊङुतः" इत्यूङि सति ह्रस्वत्वे सुतन्विति सिध्यति।

"वरतनुरथवासौ नैव दृष्टा त्वया मे"

अत्र मनुष्यजातेरविवक्षेत्यूङ् न कृतः।

ऊकारान्तादप्यूङ्प्रवृत्तेः ॥ ४८ ॥

उत ऊङ् विहितः। ऊकारान्तादपि क्वचिद्भवति। आचार्यप्रवृत्तेः। कासौ प्रवृत्तिः। 'अप्राणिजातेश्चारज्ज्वादीनाम्' इति अलाबूः कर्कन्धूरिति उदाहरणम्। तेन 'सुभ्रु किं सम्भ्रमेण'। अत्र सुभ्रुशब्द ऊङि सिद्धो भवति। ऊङि त्वसति सुभ्रूरिति स्यात्।

कार्त्तिकीय इति ठञ् दुर्धरः ॥ ४९ ॥

'कार्त्तिकीयो नभस्वान्' इत्यत्र 'कालाट्ठञ्' इति ठञ् दुर्धरः। ठञ्भवनं दुःखेन ध्रियत इति।

शार्वरमिति च ॥ ५० ॥

'शार्वरं तमः' इत्यत्र च "कालाट्ठञ्" इति ठञ् दुर्धरः।

शाश्वतमिति प्रयुक्तेः ॥ ५१ ॥

'शाश्वतं ज्योतिः' इत्यत्र शाश्वतमिति न सिद्ध्यति। 'कालात् ठञ्' इति ठञ्प्रसङ्गात्। "येषां च विरोधः शाश्वतिकः" इति सूत्रकारस्यापि प्रयोगः। आह—प्रयुक्तेः। "शाश्वते प्रतिषेधः" इति प्रयोगात् शाश्वतमिति भवति।

राजवंश्यादयः साध्वर्थे ये भवन्ति ॥ ५२ ॥

राजवंश्याः सूर्यवंश्या इत्यादयः शब्दाः "तत्र साधुः" इत्यनेन साध्वर्थे ये [यति] प्रत्यये सति साधवो भवन्ति। भवार्थे पुनर्दिगादिपाठेऽपि वंशशब्दस्य वंशशब्दान्तान्न यत्-प्रत्ययः। तदन्तविधेः प्रतिषेधात्।

दारवशब्दो दुष्प्रयुक्तः ॥ ५३ ॥

'दारवं पात्रम्' इति दारवशब्दो दुष्प्रयुक्तः। "नित्यं वृद्धशरादिभ्यः' इति मयटा भवितव्यम्। ननु विकारावयवयोरर्थयोर्मयड् विधीयते। अत्र तु दारुण इदमिति विवक्षायां दारवमिति भविष्यति। नैवमपि स्यात्। "वृद्धाच्छः" इति छविधानात्।

मुग्धिमादिष्विमनिज् मृग्यः ॥ ५४ ॥

मुग्धिमाप्रौढ़िमेत्यादिषु इमनिज् मृग्यः अन्वेषणीय इति।

औपम्यादयश्चातुर्वर्ण्यवत् ॥ ५५ ॥

औपम्यं सान्निध्यमित्यादयश्चातुर्वर्ण्यवत् 'गुणवचन-' इत्यत्र 'चातुर्वर्ण्यादीनां [स्वार्थे] उपसंख्यानम्' इति वार्त्तिकात् स्वार्थिकष्यञन्ताः।

ष्यञः षित्करणादीकारो बहुलम् ॥५६॥

"गुणवचनब्राह्मणादिभ्यः" इति यः ष्यञ् तस्य षकरणादीकारो भवति। स बहुलम्। ब्राह्मण्यमित्यादिषु न भवति।

सामग्र्यमित्यादिषु विकल्पेन ॥ ५७ ॥

सामग्र्यं सामग्री। वैदग्ध्यं वैदग्धीति।

धन्वीति व्रीह्यादिषु पाठात् ॥ ५८ ॥

व्रीह्यादिषु धन्वशब्दस्य पाठात् धन्वीति इनौ सति सिद्धो भवति।

चतुरस्रशोभीति णिनौ ॥ ५९ ॥

'बभूव तस्याश्चतुरस्रशोभि वपुर्विभक्तं नवयौवनेन'

इत्यत्र चतुरस्रशोभि इति न युक्तम्। व्रीह्यादिषु शोभाशब्दस्य पाठेऽपि इनिरत्र न सिध्यति। ग्रहणवता प्रातिपदिकेन तदन्तविधिप्रतिषेधात्। भवतु वा तदन्तविधिः। कर्मधारयान्मत्वर्थीयानुपपत्तिः। लघुत्वात् प्रक्रमस्येति बहुव्रीहिणा एव भवितव्यम्। तत्कथमिति मत्वर्थीयस्य अप्राप्तौ

चतुरस्रशोभीति प्रयोगः। आह—णिनौ। चतुरस्रं शोभत इति ताच्छील्यिके णिनौ अयं प्रयोगः। अथ 'अनुमेयशोभि" इति कथम्। नहि अत्र पूर्ववत् वृत्तिः शक्या कर्त्तुमिति शुभेः साधुकारिण्यावश्यके वा णिनिं कृत्वा तदन्तात् अभावप्रत्यये पश्चाद्बहुव्रीहिः कर्त्तव्यः। अनुमेयं शोभित्वं यस्येति। भावप्रत्ययस्तु गतार्थत्वान्न प्रयुक्तः। यथा "निराकुलं तिष्ठति", "सधीरमुवाच" इति।

कञ्चुकीया इति क्यचि ॥ ६० ॥

"जीवन्ति राजमहिषीमनु कञ्चुकीयाः" इति कथम्। मत्वर्थीयस्य च्छप्रत्ययस्याभावात्। आह—क्यचि। क्यचि प्रत्यये सति कञ्चुकीया इति भवति। कञ्चुकमात्मन इच्छन्ति कञ्चुकीयाः।

बौद्धप्रतियोग्यपेक्षायामप्यातिशायनिकाः ॥६१॥

बौद्धस्य प्रतियोगिनोऽपेक्षायामप्यातिशायनिकास्तरबादयो भवन्ति। "घनतरं तमः", "बहुलतरं प्रेम" इति।

कौशिलादय इलचि वर्णलोपात् ॥ ६२ ॥

कौशिलवासिल इत्यादयः कथम्। आह—कौशिकवासिष्ठादिभ्यः शब्देभ्यो नीतावनुकम्पायां वा "घनिलचौ च" इति इलचि कृते "ठाजादावूर्ध्वं द्वितीयादचः" इति वर्णलोपात् सिध्यन्ति।

मौक्तिकमिति विनयादिपाठात् ॥ ६३ ॥

मुक्तैव मौक्तिकमिति विनयादिपाठाद्द्रष्टव्यम्। स्वार्थिकाश्च प्रकृतितो लिङ्गवचनानि अतिवर्त्तन्ते इति नपुंसकत्वम्।

प्रातिभादयः प्रज्ञादिषु ॥ ६४ ॥

प्रातिभादयः शब्दाः प्रज्ञादिषु द्रष्टव्याः। प्रतिभा-विकृति-द्वितादिभ्यः शब्देभ्यः प्रज्ञादिपाठादणि स्वार्थिके कृते प्रातिभं वैकृतं द्वैतमित्यादयः प्रयोगाः सिद्ध्यन्तीति।

न सरजसमित्यनव्ययीभावे ॥ ६५ ॥

'मधु सरजसं मध्ये पद्मं पिबन्ति शिलीमुखाः'

इत्यादिषु सरजसमिति न युक्तः प्रयोगः अनव्ययीभावे। अव्ययीभाव एव सरजसशब्दस्य इष्टत्वात्।

न धृतधनुषीत्यसंज्ञायाम् ॥ ६६ ॥

"धृतधनुषि शौर्य्यशालिनि" इत्यत्र धृतधनुषीत्यसंज्ञायां न युक्तः प्रयोगः। 'धनुषश्च' इत्यनङ्विधानात्। संज्ञायां हि अनङ् विकल्पितः 'वा संज्ञायाम्' इति।

दुर्गन्धिपदे इद्दुर्लभः ॥ ६७ ॥

'दुर्गन्धिः कायः' इत्यादिषु दुर्गन्धिपदे इत्समासान्तो दुर्लभः। उत्पूत्यादिषु दुःशब्दस्यापाठात्।

सुदत्यादयः प्रतिविधेयाः ॥ ६८ ॥

'सा दन्तरोषात्सुदती ससर्ज' इति, "शिखरदति पतति रशना" इत्यादिषु सुदत्यादयः शब्दाः प्रतिविधेयाः। दत्रा-देशलक्षणाभावात्। तत्र प्रतिविधानम्—"अग्रान्त-' आदि-सूत्रे चकारस्यानुक्तसमुच्चयार्थत्वात्सुदत्यादिषु दत्रादेशः" इत्येके। अन्ये तु वर्णयन्ति—सुदत्यादयः स्त्र्यभिधायिनो योगरूढ़िशब्दाः। तेषु 'स्त्रियां संज्ञायाम्" इति दत्रादेशो विकल्पेन सिद्ध एवेति।

क्षतवृढ़ोरस इति न कप्। तदन्तविधिप्रतिषेधात्॥ ६९॥

'प्लवङ्गनखकोटिभिः क्षतवृढ़ोरसो राक्षसाः' इति।

अत्र वृढ़ोरःशब्दात् 'उरःप्रभृतिभ्यः कप्' इति कप् न कृतः। ग्रहणवता प्रातिपदिकेन तदन्तविधेः प्रतिषेधात्। वाक्यं तु एवं कर्त्तव्यम्—क्षतं वृढ़ोरो येषामिति।

अवैहीति वृद्धिरवद्या॥ ७०॥

अवैहीत्यत्र वृद्धिरवद्या। गुण एव युक्त इति।

अपाङ्गनेत्रेति लुगलभ्यः॥ ७१॥

अपाङ्गे नेत्रे यस्याः सा इयम् अपाङ्गनेत्रेत्यत्र लुगलभ्यः। 'अमूर्धमस्तकात् स्वाङ्गादकामे' इति सप्तम्या अलुग्विधानात्।

नेष्टाः श्लिष्टप्रियादयः। पुंवद्भावप्रतिषेधात्॥७२॥

श्लिष्टप्रियः दृढ़कान्तः इत्यादयो न इष्टाः। "स्त्रियां पुंवत्" इति पुंवद्भावस्य प्रियादिषु निषेधात्।

दृढ़भक्तिरसौ सर्वत्रेति॥ ७३॥

"दृढ़भक्तिरसौ ज्येष्ठे।" अत्र पूर्वपदस्य "स्त्रियाम्" इत्यविवक्षितत्वात्।

जलजम्बुलतादयो ह्रस्वविधेः॥ ७४॥

"जलजम्बुलताविलाः स्रवन्त्यः" "अग्रे कर्कन्धुग्रहणम्" इत्यादिषु कथं जलजम्बुलतादयः प्रयोगाः। आह—ह्रस्वविधेः। 'इको ह्रस्वोऽङ्यो गालवस्य' इति ह्रस्वविधानात्।

तिलकादयोऽजिरादिषु॥ ७५॥

तिलकादयः शब्दा अजिरादिषु द्रष्टव्याः। अन्यथा

तिलकवती कनकवतोत्यादिषु मतुपि 'मतौ बह्वचोऽनजिरादीनाम्" इति दीर्घत्वं स्यात्। केचित्तु वर्णयन्ति—"नद्यां मतुप्" इति यो मतुप् तत्रायं विधिः। तेषां मतेन अमरावतीत्यादीनामसिद्धिः।

निशम्यनिशमय्यशब्दौ प्रकृतिभेदात् ॥७६॥

निशम्यनिशमय्येत्येतौ शब्दौ श्रुत्वेत्येतस्मिन्नर्थे। शमेः "ल्यपि लघुपूर्वात्" इत्ययादेशे सति निशमय्येति भवितव्यम्, न निशम्येति। आह—प्रकृतिभेदात्। शमेर्दैवादिकस्य निशम्येति रूपम्। "शमो दर्शने" इति चुरादौ णिचि मित्संज्ञकस्य निशमय्येति रूपम्।

संयम्यनियम्यशब्दावणिजन्तत्वात् ॥ ७७ ॥

कथं संयम्यनियम्येति। "ल्यपि लघुपूर्वात्" इति णेरयादेशेन भवितव्यम्। आह—अणिजन्तत्वात्। धातोर्णिच् न कृतः। गतार्थत्वात्। यथा—"वाचं नियच्छति" इति। णिजर्थानवगतौ तु णिच् प्रयुज्यत एव। यथा—'संयमयितुमारब्धः' इति।

प्रपायेति पीङः ॥ ७८ ॥

प्रपीयेत्ययं शब्दः 'पीङ् पाने' इत्येतस्य। पिबतेर्हि "न ल्यपि" इतीत्वप्रतिषेधात्प्रपायेति भवति।

दूरयतीति बहुलग्रहणात् ॥ ७९ ॥

"दूरयत्यवनते विवस्वति' इत्यत्र दूरयतीति कथम्। णाविष्ठवद्भावे 'स्थूलदूर' इत्यादिना गुणलोपयोः कृतयो-

र्दवयतीति भवितव्यम्। आह—बहुलग्रहणात्। 'प्राति-पदिकाद्धात्वर्थे बहुलमिष्ठवच्च' इति।

अत्र बहुलग्रहणात् 'स्थूलदूर' इत्यादिसूत्रेण यद्विहितं तन्न भविष्यतीति।

गच्छतीप्रभृतिष्वनिषेध्यो नुम् ॥ ८० ॥

'हरति हि वनराजीर्गच्छती श्यामभावम्'

इत्यादिषु गच्छतीप्रभृतिषु शब्देषु 'शप्श्यनोर्नित्यम्' इति नुमनिषेध्यो निषेद्धुमशक्यः।

मित्त्रेण गोप्त्रेति पुंवद्भावात् ॥ ८१ ॥

'मित्त्रेण गोप्त्रा' इति कथम्। गोप्तृणा भवितव्यम्। 'इकोऽचि विभक्तौ' इति नुम्विधानात्। आह—पुंवद्भावात्। 'तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य' इति पुंवद्भावेन गोप्त्रेति भवति

वेत्स्यसीति पदभङ्गात् ॥ ८२ ॥

'पतितं वेत्स्यसि क्षितौ' इत्यत्र वेत्स्यसीति न सिध्यति। इट्प्रसङ्गात्। आह—पदभङ्गात् सिध्यति। वेत्स्यसीति पदं भज्यते वेत्सि—असि। असीत्ययं निपातस्त्वमित्यस्मिन्नर्थे। क्वचिद्वाक्यालङ्कारे प्रयुज्यते। यथा—

'पार्थिव त्वमसि सत्यमभ्यधाः' इति।

कामयानशब्दः सिद्धोऽनादिश्चेत् ॥८३॥

कामयानशब्दः सिद्धः 'आगमानुशासनमनित्यम्' इति मुक्यकृते यद्यनादिः स्यात्।

सौहृददौर्हृदशब्दावपि हृद्भावात् ॥८४॥

सुहृदयदुर्हृदयशब्दाभ्यां युवादिपाठादणि कृते हृदयस्य हृद्भावः। आदिवृद्धौ सौहृददौर्हृदशब्दौ भवतः। सुहृद्दुर्हृच्छब्दाभ्यां युवादिपाठादेवाणि कृते 'हृद्भगसिन्ध्वन्ते' इति हृदन्तस्य तद्धितेऽणि कृते सति उभयपदवृद्धौ सत्यां सौहार्दं दौर्हार्दमिति भवति।

विरम इति निपातनात्॥ ८५॥

रमेरनुदात्तोपदेशत्वात् 'नोदात्तोपदेशस्य' इत्यादिना वृद्धिप्रतिषेधस्य अभावात् कथं विरम इति। आह—निपातनात्। निपातनं तु 'यम उपरमे' इत्यत्रोपरम इति। अतन्त्रं चोपसर्ग इति।

उपर्य्यादिषु सामीप्ये द्विरुक्तेषु द्वितीया॥८६॥

उपर्य्यादिषु शब्देषु सामीप्ये द्विरुक्तेषु 'उपर्य्यध्यधसः सामीप्ये' इत्यनेन उपर्य्यादिषु त्रिषु। 'द्वितीयाम्रेडितान्तेषु' इति द्वितीया। वीप्सायां तु द्विरुक्तेषु षष्ठी एव भवति।

'उपर्य्युपरि बुद्धीनां चरन्तीश्वरबुद्धयः'

मन्दं मन्दमित्यप्रकारार्थत्वे॥ ८७॥

'मन्दं मन्दं नुदति पवनः' इति।

अत्र मन्दं मन्दमित्यप्रकारार्थे भवति। प्रकारार्थत्वे तु 'प्रकारे गुणवचनस्य' इति द्विर्वचने कृते कर्मधारयवद्भावे मन्दमन्दमिति प्रयोगः। मन्दंमन्दमित्यत्र तु 'नित्यवीप्सयोः' इति द्विर्वचनम्। अनेकभागात्मकस्य नुदेर्यदा सर्वे भागा मन्दत्वेन व्याप्तुमिष्टा भवन्ति तदा वीप्सेति।

न निद्राद्रुगिति। भष्भावप्राप्तेः॥ ८८॥

'निद्राद्रुकाद्रवेयच्छवि रुपरिलसद्दर्घरी वारिवाहः'

इत्यत्र निद्राद्रुगिति न युक्तः। 'एकाचो बशो भष्' इति भष्भावप्राप्तेः। अनुप्रासप्रियैस्त्वपभ्रंशः कृतः।

निष्यन्द इति षत्वं चिन्त्यम्॥ ८९॥

नहि अत्र षत्वलक्षणमस्ति। कस्कादिपाठोऽप्यस्य न निश्चितः।

नाङ्गुलिसङ्ग इति। मूर्द्धन्यविधेः ॥९०॥

स्नायन्त्यङ्गुलिसङ्गेऽपि कोमलाः कुसुमस्रजः'

इत्यत्राङ्गुलिसङ्ग इति न युक्तः। 'समासेऽङ्गुलेः सङ्गः' इति मूर्द्धन्यविधानात्।

तेनावन्तिसेनादयः प्रत्युक्ताः ॥ ९१ ॥

तेनाङ्गुलिसङ्ग इत्यनेन अवन्तिसेन इन्दुसेन एवमादयः शब्दाः प्रयुक्ताः प्रत्याख्याताः। सुषामादिषु 'एति संज्ञाया-मगात्' इति मूर्द्धन्यविधानात्।

नेन्द्रवाहने णत्वम्। आहितत्वस्याविवक्षित-त्वात् ॥ ९२ ॥

'कुथेन नागेन्द्रमिवेन्द्रवाहनम्' इत्यत्र इन्द्रवाहनशब्दे 'वाह-नमाहितात्' इति णत्वं न भवति। आहितत्वस्य अवि-वक्षितत्वात्। स्वस्वामिभावमात्रं हि अत्र विवक्षितम्। तेन सिद्धमिन्द्रवाहनमिति।

सदसन्तो मया शब्दा विधिनाल्पेन दर्शिताः।
अनयैव दिशा कार्यं शेषाणामप्यवेक्षणम् ॥

इति काव्यालङ्कारसूत्रवृत्तौ प्रायोगिके पञ्चमेऽधिकरणे द्वितीयोऽध्यायः

शब्दशुद्धिः।

समाप्तं चेदं प्रायोगिकं पञ्चममधिकरणम्।

समाप्तोऽयं ग्रन्थः।

६९ उत्तररामचरितनाटक सटीक १
७० कर्पूरमञ्जरीनाटिका सटीक ॥०
७१ चण्डकौशिकनाटक सटीक ॥०
७२ चैतन्यचन्द्रोदयनाटक सटीक २
७३ धनञ्जयविजयनाटक सटीक ।०
७४ नागानन्दनाटक सटीक ॥०
७५ नागानन्दनाटक मूल ।०
७६ प्रबोधचन्द्रोदयनाटक सटीक १
७७ प्रसन्नराघवनाटक जयदेवकृत १
७८ प्रियदर्शिका नाटिका सटीक ॥०
७९ वसन्ततिलक भाण नाटक ।✓
८० बालरामायणनाटक सटीक ३
८१ विक्रमोर्वशी नाटक (सटीक) १
८२ विद्धशालभञ्जिकानाटिका सटीक॥०
८३ वेणीसंहारनाटक सटीक ॥०
८४ मल्लिकामारुतनाटक सटीक २
८५ महानाटक हनुमन्नाटक सटीक १॥
८६ महानाटकम् (हनुमन्नाटकम्) ॥०
८७ महावीरचरितनाटक सटीक १॥०
८८ महावीरचरितनाटक मूलमात्र ॥०
८९ मालतीमाधवनाटक सटीक ॥०
९० मालविकाग्निमित्रनाटक सटीक १
९१ मुद्राराक्षसनाटक सटीक १
९२ मृच्छकटिकनाटक सटीक १॥०
९३ रत्नावलीनाटिका सटीक ॥०
९४ शकुन्तलानाटक सटीक १
९५ काव्यप्रकाश अलङ्कार सटीक ४
९६ काव्यादर्श सटीक (अलङ्कार) १
९७ काव्यदीपिका अलङ्कार सटीक ॥०
९८ कुवलयानन्द अलङ्कार सटीक २
९९ चन्द्रालोक प्राचीन अलङ्कार ।०
१०० दशरूपकम् (अलङ्कार) १
१०१ साहित्यदर्पण सटीक अलङ्कार१॥
१०२ साहित्यदर्पणम् (मूलमात्र) ॥०
१०३ काव्यालङ्कारसूत्रवृत्तिवामनकृत ॥०
१०४ वाग्भटालङ्कार ।०
१०५ सरस्वतीकण्ठाभरण सटीक ३
१०६ सङ्गीतपारिजात[सङ्गीतशास्त्र]१॥०
१०७ छन्दोमञ्जरी वृत्तरत्नाकर सटीक ॥
१०८ श्रुतबोध: (छन्दोग्रन्थ) सटीक ✓
१०९ पिङ्गलछन्द: शास्त्र वृत्तिसहित १॥
११० महानिर्वाणतन्त्रम् सटीक ४
१११ शारदातिलक तन्त्रम् ३
११२ मन्त्रमहोदधि तन्त्र सटीक ३
११३ रुद्रयामल तन्त्र ३-
११४ इन्द्रजालविद्यासंग्रह: ३
११५ कामन्दकी नीतिसार: ॥०
११६ चाणक्यशतकम् सटीक ✓
११७ शुक्रनीतिसार: सटीक २
११८ गयाश्राद्धादिपद्धति: १
११९ तुलादानादिपद्धति: (बङ्गाक्षरे:)४
१२० धर्मशास्त्रसंग्रह: १०
१२१ वीरमित्रोदय (स्मृतिशास्त्र) ५
१२२ मनुसंहिता कुल्लूकभट्टकृत टीका-
सहित ६
१२३ वेदान्तदर्शन सभाष्य सटीक ६
१२४ भामती(वेदान्त)वाचस्पतिमिश्रकृत३
१२५ वेदान्तपरिभाषा ॥०
१२६ वेदान्तसार सटीक ॥०
१२७ विवेकचूडामणि वेदान्त ।✓
१२८ पञ्चदशी (सटीक) वेदान्त १॥०
१२९ सिद्धान्तबिन्दुसार: (वेदान्त) ॥०
१३० पूर्णप्रज्ञदर्शनम् सभाष्य ॥०
१३१ न्यायदर्शन (भाष्यसहित) २
१३२ सांख्यसूत्र अनिरुद्धवृत्तिसहित ॥०
१३३ साङ्ख्यसार ।०
१३४ सांख्यतत्त्वकौमुदी सटीक २
१३५ सांख्यकारिका गौड़पादभाष्य ॥०

१३६ मीमांसादर्शनम् भाष्यसहित १२
१३७ मीमांसापरिभाषा ।०
१३८ शाण्डिल्यसूत्र सभाष्य ॥०
१३९ जैमिनीय (न्यायमालाविस्तर:) ६
१४० अर्थसंग्रह (लौगाचिमीमांसा) ।०
१४१ न्यायदर्शन सभाष्य सवृत्ति २॥०
१४२ भाषापरिच्छेद: मुक्तावली ॥०
१४३ भाषापरिच्छेदमुक्तावली दिनकरी १॥
१४४ शब्दशक्तिप्रकाशिका (न्याय) ॥।०
१४५ कुसुमाञ्जलि सटीक (न्याय) ।०
१४६ उपमानचिन्तामणि: /
१४७ आत्मतत्त्वविवेक (वौद्धाधिकार) २
१४८ अनुमानचिन्तामणि: सटीक ४॥
१४९ तर्कामृत (जगदीशकृत) न्याय ।०
१५० तर्कसंग्रह इं अनुवादसहित ॥०
१५१ पातञ्जलदर्शन (सभाष्य सटीक) २
१५२ पातञ्जलदर्शन भोजवृत्तिसहित १
१५३ वैशेषिकदर्शनम् सटीक ३
१५४ सर्वदर्शनसंग्रह: [दर्शनशास्त्र] १
१५५ आथर्वणोपनिषद् सभाष्य ३
१५६ आरण्यसंहिता सभाष्य ॥०
१५७ ईश केन कठ प्रश्न मुण्ड माण्डूक्य उपनिषद् (सटीक सभाष्य) ३
१५८ गायत्री व्याख्या ॥०
१५९ गोपथब्राह्मण (अथर्ववेदस्य) १
१६० छान्दोग्य उपनिषद् सटीक सभाष्य ३
१६१ तैत्तिरीय ऐतरेय श्वेताश्वतर सभाष्य २
१६२ दैवत तथा षड्‌विंशब्राह्मणसभाष्य २
१६३ निरुक्त सभाष्य सटीक १२
१६४ नृसिंहतापनी सभाष्य २
१६५ वृहदारण्यक सटीक सभाष्य ७
१६६ मुक्तिकोपनिषत् /
१६७ शुक्लयजुर्वेदसंहिता सभाष्य ४
१६८ शुक्लयजुर्वेदस्य प्रातिशाख्य सभाष्य २
१६९ सामवेदसंहिता सभाष्य ४
१७० अग्निपुराणम् १
१७१ अध्यात्मरामायणम् सटीक २
१७२ कल्किपुराणम् १
१७३ गरुड़पुराणम् २
१७४ सटीक वाल्मीकिरामायण बालकाण्डम् १
१७५ विष्णुपुराणम् सटीक ६
१७६ ब्रह्मवैवर्त्तपुराण सम्पूर्ण ४
१७७ मत्स्यपुराणम् २
१७८ मार्कण्डेयपुराणम् १॥०
१७९ लिङ्गपुराणम् २
१८० श्रीमद्भगवद्गीता सभाष्य सटीक ४
१८१ अष्टाङ्गहृदय (वाग्भट) वैद्यक ६
१८२ चक्रदत्त (वैद्यक) १॥०
१८३ चरकसंहिता (वैद्यक) सम्पूर्ण ६
१८४ माधवनिदान सटीक १॥०
१८५ भावप्रकाश (वैद्यक) ५
१८६ मदनपालनिर्घण्टु: (वैद्यक) ॥०
१८७ रसेन्द्रचिन्तामणितथारससरत्नाकर ६
१८८ शार्ङ्गधरसंहिता (वैद्यक)
१८९ सुश्रुतसंहिता सटीक (वैद्यक) १
१९० सुश्रुतसंहिता मूलमात्र (वैद्यक) ६
१९१ चिकित्सासारसंग्रह वङ्गसेनकृत
१९२ गणिताध्याय: भास्कराचार्य्यकृत
१९३ गोलाध्याय: भास्कराचार्य्यकृत ॥
१९४ वृहत्संहिता वा वाराहीसंहिता
१९५ भावकुतूहल (ज्योतिष) ॥०
१९६ लीलावती भास्कराचार्य्यरचित ॥०
१९७ वीजगणित भास्कराचार्य्यरचित ॥०
१९८ सूर्य्यसिद्धान्त सटीक

कलिकाता संस्कृतविद्यामन्दिरे वि, ए, उपाधिधारिण:
श्रीजीवानन्दविद्यासागर-भट्टाचार्य्यस्य सकाशात् लभ्यानि।

पुस्तक लौटाने की तिथि अन्त में अङ्कित है। इस तिथि को पुस्तक न लौटाने पर छै नये पैसे प्रति पुस्तक अतिरिक्त दिनों का अर्थदण्ड लगेगा।